क्षणाक्लेशरूपाशुद्धिक्षये या ज्ञानदीप्तिस्तारतम्येन सात्त्विकः परिणामो
विवेकख्यातिपर्यंतं स तस्याः ख्यातेर्हेतुरित्यर्थः योगांगानुष्ठानादशुद्धिक्षय इ

मयासोयंनज्ञातंकिंचिद्दित्तीणामसन्नोथानमेकिंचित् सेतन्मामत्तिम्न
क्षिगतंमयाहानंमाम्नामयाविवेकरव्यातिदिरित्तेयाप्रत्तुयांतरपरिह्वारेणतस्या
मवस्थायामीढप्रोवप्नत्राजायतेद्दृश्यीप्रत्याकायविषयंनिर्मलंज्ञानंकार्यवि
नष्टिःसिसृक्षातेविधिनविसृष्टिःसिंधाचरित्वार्थाऽप्यनुक्रियताःकृत्नाधिकारं।
मितिविवृत्तिविधिनाः इत्यधानापाः [illegible] नः। स्थितिगायांविश्वकारणोद्दुत्त्यां
निष्ठुत्वानांगोत्रानिधानमन्नु [illegible] नात् निष्योजन्नत्वानरचामीमांकु
नः। सर्वोहंमायाद्दृशीभूतप्रमेय [illegible] । [illegible] सिन्मा विद्यत्वोपपत्तिशोद्दृष्ट्वितिर्दं

३९ वीनर्थहेतुः तदस्माद्वो हिंसा हिंसायाः सर्वप्रकारमेवत्यागः न्यत्वात् ॥ शयमंतरमा
वरूपायाश्च हिंसाया निर्देशः सत्यं वाङ्मनसोर्यथार्थत्वं ॥ स्तेयं परस्वपरिग्र
हः तदभावोऽस्तेयं ब्रह्मचर्यमुपस्थसंयमः ॥ अपरिग्रहो भोगसाधनानामस्वी
कारः ते एते अहिंसादयः ॥ पंच यमशब्द वाच्या योगांगत्वेन निर्दिष्टाः एषां वि
शेषमाह ॥ एते तु जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रतं
जातिर्ब्राह्मणत्वादिः देशस्तीर्थादिः कालश्चतुर्दश्यादिः समयो ब्राह्मणप्र
योजनादिः एतैश्चतुर्भिरनवच्छिन्नाः पूर्वोक्ता अहिंसादयो यमाः सर्वासु हि ३९

स्तुनेकानि पुनस्तानि योगांगानीति तेषामुद्देशमाह ॥ यमनियमासन
प्राणायामप्रत्याहारधारणाध्यानसमाधयोष्टावंगानि ॥ इह कानिचित्स
माधेः साक्षादुपकारकत्वेनांतरंगाणि यथा धारणादीनि कानिचित् ॥ प्र
तिपक्षभूतहिंसादिवितर्कोन्मूलनद्वारेण समाधेरुपकुर्वंति यथा यमनिय
मादयः तत्रासनादीनामुत्तरोत्तरमुपकारकत्वं ॥ यथा सत्यासनजये प्राणाया
मस्थैर्यं एवमुत्तरेपि योजनीयं क्रमेणैषां स्वरूपमाह ॥ अहिंसासत्यास्तेय
ब्रह्मचर्यापरिग्रहा यमाः ॥ तत्र प्राणवियोगप्रयोजनव्यापारो हिंसा सा च स

पं१ वितर्कैरेत इति वितर्का योगप्रतिपंथिनो हिंसादयस्तेषां प्रतिपक्षभावने सति यदि ३

नं। आंतरं च मैत्र्यादिभिः चित्तमलानां प्रक्षालनं संतोषस्तुष्टिः शेषाः प्रागेव कृ
३० तव्याख्यानाः एते शौचादयो नियमपदवाच्याः कथमेषां योगांगत्वमित्याह वित
र्कबाधने प्रतिपक्षभावनं। बाधा न भवति तदा योगः सुकरो भवति एवं यमनियमा
नां योगांगत्वमिदानीं वितर्काणां स्वरूपं भेदप्रकारं कारणं फलं च क्रमेणाह ॥
वितर्का हिंसादयः कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्या
धिमात्रा दुःखाज्ञानानंतफला इति प्रतिपक्षभावना ॥ एते पूर्वोक्ता हिंसादयः । प्र
थमं त्रिधा भिद्यंते कृतकारितानुमोदनभेदेन तत्र स्वयं निष्पादिताः कृताः कु ३०

ग्रादिषु चित्तन्मिषुमवा महाव्रतमित्युक्तेन यथा ब्राह्म[illegible] हनिष्यामीति
तीर्थे कंचन न हनिष्यामि चतुर्दश्यां न ह[illegible]मि देवब्राह्मणार्थव्यतिरेके
ण न हनिष्यामीति एवं विधावच्छेदव्यतिरेकेण किंचित् ॥ क्वचित्कदा
चित्कस्मिंश्चिदप्यर्थे न हनिष्यामीत्यनवच्छिन्ना एवं सत्यादिषु यथायोग्यं यो
ज्यं इत्थमनियतीकृताः सामान्येनैव प्रवृत्ता महाव्रतमित्युच्यते न पुनः परकी
पावस्थादिधारणं नियमानाह ॥ शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि
नियमाः ॥ शौचं द्विविधं बाह्यमाभ्यंतरं च बाह्यं मृज्जलादिभिः कायादिप्रक्षाल

क्रोधः कृत्याकृत्यविवेकोन्मूलनप्रज्वलनात्मकश्चित्तधर्मः प्रत्येकं कृतादि
६१ भेदेन त्रिप्रकाराश्चापि हिंसादयो मोहादिकारणत्वेन त्रिधा भिद्यंते तेषामेव पुनरव
स्थाभेदेन त्रैविध्यमाह मृदुमध्याधिमात्रा॥ इति मृदवो मंदाः नतीव्रा नातिमंदा मध्या
अधिमात्रास्तीव्रा पाश्चात्यानवभेदाः। इत्थं त्रैविध्ये सति सप्तविंशतिर्भवंति हिंसादीना
38 मपि प्रत्येकं मृदुमध्याधिमात्रभेदेन त्रैविध्यं संभवति तद्यथायोगं योज्यं तद्यथा मृ मृदु २
दुमृदुमध्यो मृदुतीव्र इति एषां फलमाह दुःखाज्ञानानंतफला इति दुःखं प्रतिकू
लतयावभासमानो राजसश्चित्तधर्मः अज्ञानं मिथ्याज्ञानं संशयविपर्ययरूपं ते ६१

रु कुर्वीति प्रयोजकव्यापारेण समुत्पादितो कारितः। अन्येन क्रियमाणः स्वामि
त्वंगीकृतः अनुमोदितः एतच्च त्रैविध्यं परस्य व्यामोहनिवारणायोच्यते अन्यथा
मंदमतिरेवं मन्येत न मया स्वयं हिंसा कृतेति नास्ति मे दोष इति एषां कारणप्रति
पादनायाह क्रोधलोभमोहमूला इति यद्यपि लोभः प्रथमं निर्दिष्ट स्तथापि सर्वक्ले
शानां मोहस्यानात्मनि आत्माभिमानलक्षणस्य निदानत्वात्॥ तस्मिन् सति
स्वपरविभागपूर्वकत्वेन लोभक्रोधादीनामुद्भवात् तस्मात्समत्वसेयं मोहपूर्विका
सर्वा दोष जातिरित्यर्थः लोभ [illegible] लक्ष्मा

सत्याभ्यासवतोयोगिनः तथासन्नं [illegible]ध्यतेयथाअकृतायामपिक्रियायां
४२ योगीफलमाप्नोतितद्वचनाद्यस्यकस्यचित्क्रियामकुर्वतोपिक्रियाफलंभ
वतीत्यर्थः। अस्तेयाभ्यासवतःफलमाह॥ अस्तेयेसर्वरत्नोपस्थानं अस्तेयं
यदाभ्यस्यतियोगीतदातस्यतत्प्रकर्षान्निरभिलाषस्यापिसर्वतोदिव्यानिर
त्नान्युपतिष्ठंते ब्रह्मचर्याभ्यासवतःफलमाह। ब्रह्मचर्यप्रतिष्ठायांवीर्य
३९ लाभः॥ यःकिलब्रह्मचर्यमभ्यस्यतितस्यतत्प्रकर्षान्निरतिशयंवीर्यंसामर्थ्य
माविर्भवतिवीर्यनिरोधोहिब्रह्मचर्यंतस्यप्रकर्षात्शरीरेंद्रियमनस्सुवीर्यं

दुखाज्ञाने अनंतमपरिछिन्नं फलं येषां ते तथोक्ता इत्थं तेषां स्वरूपकारणा
दिभेदेन ज्ञातानां प्रतिपक्षभावनया योगिना परिहारः कर्तव्य इत्युपदिष्टं भवति
एषामभ्यासात्प्रकर्षमागच्छतामनुनिष्पादितः सिद्धयो यथा भवंति तथा क्रमे
ण प्रतिपादयितुमाह ॥ तत्सन्निधौ वैरत्यागः तस्याहिंसां भावयतः संनिधौ सहज
विरोधिनामप्यहिनकुलादीनामपि वैरत्यागो निर्मत्सरतयावस्थानं भवति हिं
स्रा अपि हिंस्रत्वं परित्यजंतीत्यर्थः सत्यं भावयतः किं भवतीत्याह ॥ क्रियाफलाश्र
यत्वं ॥ क्रियमाणा हि क्रिया यागादिकाः फलं स्वर्गादिकं प्रयच्छंति सत्य

ततस्स्वांगेष्वपि कारणस्वरूपपर्य्यालोचनद्वारेण जुगुप्सा घृणा जायते। अ
४२ शुचिरयं कायो नात्राग्रहः कार्य्य इत्यमुनैव हेतुना परैरसंसृष्टकायैर
भिरसंसर्गः संपर्काभावः संसर्गपरिवर्जनमित्यर्थः। यः किल स्वयमेव कायं जु
गुप्सते तदवद्यदर्शनात्मकथं परकीयैस्तथा भूतैः कायैः संसर्गमनुभवति
40 शौचस्यैव फलान्तरमाह। सत्त्वशुद्धिसौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयो
ग्यत्वानि भवन्तीति वाक्यशेषः। सत्त्वं प्रकाशसुखात्मकं तस्य शुद्धिः रजस्तमो
भ्यामनभिभवः। सौ[illegible]मनस्यं खेदाननुभवेन मानसी प्रीतिः। एकाग्रता

वतःफलमाह
संबोधः सम्यक्ज्ञानं जन्मांतरे कोहमाशं १

प्रकर्षेमागच्छति अपरिग्रहाभ्यासे कीदृशः किंकार्यकारीति जि[illegible] । यथांसर्व
मेवसम्यग्जानातीत्यर्थः नकेवलंभोगसाधनपरिग्रहएवपरिग्रहः यदात्म
नः शरीरादिपरिग्रहोपिपरिग्रहोभोगसाधनत्वात्शरीरस्यतस्मिन्सति
रागानुबंधाद्बहिर्मुखायामेवप्रवृत्तौनतात्विकज्ञानप्रादुर्भावः यदापु
नः शरीरादिपरिग्रहनैरपेक्ष्येणमाध्यस्थ्यमेवभवतितदामध्यस्थस्यरागा
द्भावात्सम्यग्ज्ञानहेतुर्भवत्येवपूर्वापरजन्मसंबोधः ज्ञायमानोंसि
द्धोयं नियमानां । शौचात्स्वांगजुगुप्सापरैरसंसर्गः यः शौचं भावयत् ।

४१ 41

श्चेतसः क्लेशादिलक्षणाशुद्धिक्षयद्वारेणकायेंद्रियाणांसिद्धिमुत्कर्षमा
दधातिअयमर्थः। चांद्रायणादिनाचित्तक्लेशक्षयःतत्क्षयादिंद्रियाणांनिर्म
लतपावस्थानंभवतिसूक्ष्मव्यवहितःविप्रकृष्टदर्शनादिसामर्थ्यमावि
र्भवतिकायस्ययथेच्छमणुत्वमहत्त्वादिस्वाध्यायस्यफलमाह॥स्वाध्या
यादिष्टदेवतासंप्रयोगः॥ अभिप्रेतमंत्रजपादिलक्षणेस्वाध्यायेप्रकृष्यमा
णेयोगिनइष्टयाभिप्रेतयादेवतयासंप्रयोगोभवति। सादेवताप्रत्यक्षीभ
वतीत्यर्थः। ईश्वरप्रणिधानस्यफलमाहसमाधिसिद्धिरीश्वरप्रणिधाना

न्नियतेंद्रियविजयेचेतसः । श्रेयोंद्रियजयो विषयपराङ्मुखानामिंद्रिया
णां स्वात्मन्यवस्थानेन आत्मदर्शने ॥ विवेकख्यातिरूपे चेतस्य योग्यत्वं समर्थ
त्वं शौचाभ्यासवतः एतेन सत्वशुद्ध्यादयः क्रमेण प्रादुर्भवंतीत्यादि सत्वशुद्धे
सौमनस्यादिंद्रियजयः इंद्रियजयादात्मदर्शनयोग्यतेति संतोषाभ्यासस्य ।
फलमाह ॥ संतोषादनुत्तमसुखलाभः ॥ संतोषप्रकर्षेण योगिनस्तथाविध ।
मांतरसुखमाविर्भवति यस्य बाह्यं विषयसुखं शतांशेनापि समानं न भवति
तपसः फलमाह ॥ कायेंद्रियसिद्धिरशुद्धिक्षयात्तपसः ॥ तपः समभ्यस्यमानं

आकाशादिगते। आनंत्ये चेतसः समापत्तिः क्रियते अवधानेन तादात्म्यमाप
५५ द्यते तदा देहाहंकाराभावान्नासनं दुःखजनकं भवति अस्मिंश्चासनजये
सति समाध्यंतरायभूता न प्रभवंत्यंगमेजयत्वादयः॥ तस्यैवानुनिषादित
स्य फलमाह॥ ततो द्वंद्वानभिघातः॥ तस्मिन्नासनजये सति द्वंद्वैः शीतोष्ण
क्षुत्तृडादिभिर्योगी नाभिहन्यत इत्यर्थः॥ आसनजयादनंतरं प्राणा
याममाह॥ तस्मिन्सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः॥ आस
नस्थैर्ये सति तन्निमित्तकः प्राणायामलक्षणो योगांगविशेषोनुष्ठेयो भव

त॥ ईश्वरे योयं भक्तिविशेषस्तस्मात्समाधेः स्कलत्नणस्याविर्भावो भवति
यस्मात्स भगवानीश्वरः प्रसन्नः सन्नंतरायरूपान्क्लेशान्परिहृत्य स
माधिमुद्बोधयति॥ यमनियमानुक्त्वासनमाह स्थिरसुखमासनं॥ आस्यतेने
नेति आसनं पद्मासनं दंडासनं स्वस्तिकासनादि तद्यथा स्थिरं निःकंपं सु
खं तत्प्राप्त्यर्थमुपायमाह॥ प्रयत्नशैथिल्यानंत्यसमापत्तिभ्यां तदासनं प्रय
त्नशैथिल्येनानंत्यसमापत्त्या च स्थिरसुखं भवतीति संबंधः यदा यदासनं बध्ना
मीतीच्छां करोति प्रयत्नशैथिल्येप्यक्लेशेनैव तदासनं निष्पद्यते यदा
मनुष्येण जनितानंत्यं च भवति तदा तद्योगांगतां भजते तस्येवास्थिरसुखं ३

४६

43

भवतिदेशेनोपलक्षितोयथानासाग्राद्‌दृष्टांतादेःकालेनोपलक्षितो
यथाषट्त्रिंशन्मात्रादिप्रमाणःसंख्ययोपलक्षितोयथाइयतोवारा
न्कृतमेतावद्भिःश्वासप्रश्वासैःप्रथमउद्घातोभवतीति
एतज्ज्ञानायसंख्याग्रहणमुपात्तमुद्घातोनामनाभिमूलात्प्रेरितस्य
वायोशिरस्यभिहननंत्रीन्प्राणायामानभिधायचतुर्थमभिधातुमाह
बाह्याभ्यंतरविषयाक्षेपीचतुर्थः।प्राणस्यबाह्योविषयद्वादशांतादि
भ्यंतरोविषयोहृदयनाभिचक्रादिःतौद्वौविषयावाक्षिप्यपर्यालोच्ययः

ति कीदृशः श्वासप्रश्वासयोर्गतिविच्छेदलक्षणः श्वासप्रश्वासावुक्तलक्षणौ
तयोस्त्रिधा रेचनाक्षेपणपूरणद्वारेण बाह्याभ्यंतरेषु स्थानेषु गतेः प्रवाह
स्य विच्छेदो धारणं प्राणायाम उच्यते तस्यैव सुखावगमाय विभज्य स्वरू
पं कथयति स तु बाह्याभ्यंतरस्तंभवृत्तिर्देशकालसंख्याभिः परिदृष्टो दी
र्घसूक्ष्मः बाह्यवृत्तिः श्वासो रेचकः अंतर्वृत्तिः प्रश्वासः पूरकः अंतस्तंभवृ
त्तिः कुम्भकः तस्मिन् जलमिव कुंभे निश्चलतया प्राणा अवस्थाप्यंत इति
त्रिविधोयं प्राणायामो देशेन कालेन संख्यया चोपलक्षितो दीर्घसूक्ष्मसंज्ञो

तासुप्राणायामैःक्षीणदोषंमनोयत्रधार्यतेतत्रस्थिरोभवतिनविक्षेपंभज
तेप्रत्याहारस्यलक्षणमाहस्वस्वविषयासंप्रयोगेचित्तस्वरूपानुकारइवे
६७ न्द्रियाणांप्रत्याहारः इंद्रियाणिविषयेभ्यः प्रतीपमाह्रीयतेऽस्मिन्नि
तिप्रत्याहारःसचकथंनिष्पद्य तेइत्याहचक्षुरादीनामिंद्रियाणांस्वस्व
विषयो [illegible] रूपादिस्तेनसंप्रयोगस्तदाभिमुख्येनसंप्रवर्तनंतदभाव
स्तदाभिमुख्यंपरित्यज्यस्वरूपमात्रेवस्थानंतस्मिन्सतिचित्तस्वरूपमात्रा
नुकारीणींद्रियाणिभवंतियतश्चित्तमनुवर्तमानानिमधुकरराजमिव

म्भरूपो गतिविच्छेदः स चतुर्थः प्राणायामः तृतीयस्मात्तु कुंभकाख्यादयम
स्य विशेषः स बाह्याभ्यंतरौ विषयावपर्यालोच्यैव सहसैव तप्तोपलनिपति
तजलन्यायेन युगपत्स्तंभवृत्त्या निष्पाद्यते अस्य तु विषयद्वयाक्षेपको
निरोधः अयमपि पूर्ववद्देशकालसंख्याभिरुपलक्षितो द्रष्टव्यः बहुविध
स्यास्य फलमाह ततः क्षीयते प्रकाशावरणं तस्मात् प्राणायामात् प्र
काशस्य चित्तसत्वगतस्य यदावरणं क्लेशरूपं तत्क्षीयते विनश्यति इत्य
र्थः फलांतरमाह धारणासु च योग्यता मनसः धारणा वक्ष्यमाणलक्षणा

यविपाकस्य स्वरूपं कारणं चाभिहितं तत्त्याज्यत्वात् क्लेशादीनां ज्ञान
५८ मतिरेकेण त्यागस्याशक्यत्वात् ज्ञानस्य च शास्त्रीयत्वात् शास्त्रस्य चेहे
यहानकारणत्वेनोपादेयोपादानकारत्वेन चतुर्व्यूहत्वात् हेयस्य हानव्य ॥ ३
45 तिरेकेण स्वरूपानिष्पत्तेर्हानसहितं चतुर्व्यूहं स्वस्वकारणसहितमभि
धायोपादेयकारणभूताया विवेकख्यातेः कारणभूतानामंतरंगबहि
रंगभावेन स्थितानां योगांगानां स्वरूपं फलसहितं व्याकृत्य धारणापर्यंता
नां चासनादीनां परस्परमुपकार्योपकारकभावेनावस्थितानामुद्देश

मधुकमक्षिकाःसर्वाणीइंद्रियाणिप्रतीयंतेअतश्चित्तनिरोधेतानिप्रत्या
हृतानिभवंतितेषांतत्स्वरूपानुकारः प्रत्याहारुक्तःफलमाह ततःप
रमावश्यतेंद्रियाणांअभ्यस्यमानेहिप्रश्रस्यमानेहिप्रत्याहारेतथा
वश्यान्यायत्तानींद्रियाणिसंपद्यंतेयथाबाह्यविषयाभिमुखतांनी
यमानान्यपिनयांतीत्यर्थः तदेवंप्रथमपादोक्तलक्षणस्ययोगस्यांगम्
तंक्लेशतनुकरणफलं क्रियायोगमभिधायक्लेशानामुद्देशंस्वरूपं
कारणंक्षेत्रंफलंचोक्त्वांकर्मणामपिभेदंकारणंस्वरूपंफलंचाभिधा

द्धिश्चतिपादनायतदुपक्रतेतत्रधारणायास्वरूपमाहदेशबंधश्चित्तस्य।
४९ धारणेत्युच्यतेदेशेनाभिचक्रनासाग्रादौचित्तस्यबंधोविषयांतरपरि
हारेणयत्स्थिरीकरणंसाचित्तस्यधारणेत्युच्यते अयमर्थोनाभ्या
दिचित्तपरिकर्मवासितांतःकरणेनयमनियमवताजितासनेनप
रिहृतप्राणविक्षेपेणप्रत्याहृतेंद्रियग्रामेणनिर्बाधेप्रदेशेऋजुका
येनजितद्वंद्वेनयोगिनानासाग्रादौसंप्रज्ञातस्यसमाधेरभ्यासायचेतसः
स्थिरीकरणंकर्त्तव्यमितिधारणामभिधायध्यानमभिधातुमाह त

मभिधायं प्रत्येकं लक्षणं कारणपूर्वं फलमभिहितं योगो यमनियमादि
भिराप्तबीजभावः आसनप्राणायामैरंकुरितः प्रत्याहारेण पुष्पितो
ध्यानधारणासमाधिभिः फलिष्यति इति व्याख्यातः साधनपादः इ
ति महाराजाधिराजश्रीभोजदेवविरचितायां राजमार्तंडाभिधानायां
पातंजलयोगशास्त्रवृत्तौ द्वितीयः साधनपादः २ यत्पादपद्मस्मरणाद
णिमादिविभूतयः भवंति भाविनामक्तमतं नाथसंभूतये १ तदेवं पूर्वो
द्दिष्टं धारणाद्यंगत्रयं निर्णेतुं संयमसंज्ञाभिधानपूर्वकं बाह्याभ्यंतरादिसि।

स्मृतः समाधिरुक्तलक्षणस्य योगांगत्रयस्य व्यवहाराय तांत्रिकीं संज्ञां
५० कर्तुमाह त्रयमेकत्र संयमः एकस्मिन्विषये ध्यानधारणासमाधिल
क्षणं त्रितयं प्रवर्त्तमानं संयमसंज्ञया शास्त्रे व्यवह्रियते तस्य फलमाह
तज्जयात्प्रज्ञालोकः तस्य संयमस्य जयादभ्यासेन सात्म्योत्पादनात् प्रज्ञा
47 याज्ञातव्यविवेकस्वरूपाया आलोकः प्रसरो भवति प्रज्ञा ज्ञेयं सम्यगवभा
सयतीत्यर्थः तस्योपयोगमाह तस्य भूमिषु विनियोगः तस्य संयमस्य भू
मिषु स्थूलसूक्ष्मावलंबनभेदेन स्थितासु चित्तवृत्तिषु विनियोगः कर्तव्यः

त्रप्रत्ययैकतानताध्यानं तत्र तस्मिन्देशे यत्र चित्तं धृतं तत्र प्रत्ययस्य ।
ज्ञानस्य या एकतानता विशदृशपरिणामपरिहारद्वारेण यदेव धा
रणायामालंबनीकृतं तदालंबनतयैव निरंतरमुत्पत्तिः साध्यान
मुच्यते चरमं योगांगं समाधिमाह तदेवार्थमात्रनिर्भासं स्वरूपशून्यमि
व समाधिः तदेवोक्तलक्षणं ध्यानं तत्रार्थमात्रनिर्भासमर्थाकारसमा
वेशादुद्भूतार्थरूपं न्यग्भूतज्ञानस्वरूपत्वेन स्वरूपशून्यतामिवापद्यते
स समाधिरित्युच्यते सम्यगाधीयते एकाग्रीक्रियते विक्षेपान्परिहृत्य य

जा निर्बीजस्यनिरालंबस्यशून्यतापरपर्यायस्यसमाधेरेतदपि
५१ योगांगत्रयंबहिरंगंपारंपर्येणोपकारकत्वात् इदानींयोगांगसिद्धी
राख्यातुकामःसंयमस्यविषयपरिशुद्धिंकर्तुंक्रमेणपरिणामत्रय
माह व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौनिरोधक्षणचि
48 त्तान्वयोनिरोधपरिणामः व्युत्थानंक्षिप्तमूढविक्षिप्ताख्यंभूमित्रयं
निरोधःप्रकृष्टसत्वस्यांगितयाचेतसःपरिणामस्ताभ्यांव्युत्थान
निरोधाभ्यांयेजनिताःसंस्कारास्तयोर्यथाक्रममभिभवप्रादुर्भावौय

अथ धरामध्यरां चित्तभूमिं जितां जितां त्यक्त्वोत्तरस्यामुत्तरस्यां भूमौ संयम
कार्यः नह्यसात्मीकृताधरा [illegible] भूमिः उत्तरस्यां भूमौ संयमं कुर्वाणः फ
लभाग्भवति साधनपादे न योगांगानि अष्टावुद्दिष्टपंचानां लक्षणं वि
धाय त्रयाणां कथं न कृतमित्याशंक्याह त्रयमंतरंगं पूर्वेभ्यः पूर्वेभ्यो य
मादिभ्यो योगांगेभ्यः पारंपर्येण समाधेरुपकारकेभ्यो धारणादियो
गांगत्रयं संप्रज्ञातस्य समाधेरंतरंगं समाधिस्वरूपनिष्पादनात् तस्या
पि समाध्यंतरापेक्षया बहिरंगत्वमाह तदपि बहिरंगं निर्बीजस्य

णामंस्थैर्यमुच्यते अस्यैवफलमाह तस्यप्रशांतवाहितासंस्का
रात्॥० तस्यचेतसःउक्तान्निरोधसंस्कारात्प्रशांतवाहिताभवति
५२ परिहृतविक्षेपतयासदृशप्रवाहपरिणामिचित्तंभवतीत्यर्थः नि
रोधपरिणाममभिधायसमाधिपरिणाममाह सर्वार्थतैकाग्र
तयोःक्षयोदयौचित्तस्यसमाधिपरिणामः सर्वार्थताचलतयानाना
विधार्थग्रहणंचित्तस्यविक्षेपोधर्मःएकस्मिन्नेवालंबनेसदृशपरिणा
मिताएकाग्रतातदपिचित्तस्यधर्मःतयोर्यथाक्रमंक्षयोदयौसर्वार्थता

द्भवतः अभिभवो न्यग्भूततया कार्यस्य करणेसामर्थ्येनाव-
स्थानं प्रादुर्भावो वर्तमानेऽध्वनि अभिव्यक्तरूपतयावस्थानं यस्या
निरोधक्षणे चित्तस्यान्वयवृत्तित्वादन्वयो यः स निरोधः परिणाम इ-
त्युच्यते अयमर्थः यदा व्युत्थानसंस्काररूपो धर्मस्तिरोभूतो भवति नि-
रोधसंस्काररूपश्चाविर्भवति धर्मिरूपतया च चित्तमुभयत्रान्वयित्वे-
नावस्थितं प्रतीयते तदा स निरोधपरिणामशब्देन व्यवह्रियते चल-
त्वाद्गुणवृत्तस्य यद्यपि चेतसो निश्चलत्वं नास्ति तथाप्येवंभूतः परि-

र्तमानेध्वनिष्क्रांतत्वं तृतीयमेकाग्रतापरिणाममाह शांतोदितौ
५२ तुल्यप्रत्ययौ चित्तस्यैकाग्रतापरिणामः समाधिस्थस्यैव चित्तस्यैक
प्रत्यययोर्वृत्तिविशेषयोः शांतोतीतमध्वानं प्रविष्टः अपरस्तूदितो
वर्तमानेध्वनिस्फुरितो द्वावपि समाहितचित्तत्वेन तुल्यौ एकरूप त
पालंबनत्वेन सदृशौ प्रत्ययावुभयत्रापि समाहितस्यैव चित्तस्या
न्वयित्वेनावस्थानं स एकाग्रतापरिणाम इत्युच्यते चित्तस्य परिणा
मोक्तरूपमन्यत्रातिदिशन्नाह एतेन भूतेंद्रियेषु धर्मलक्षणावस्था
50

लक्षणस्य धर्मस्य लक्षयोश्चैत्वं तमाहितेन च: एकाग्रतालक्षणस्य धर्मस्य
प्रादुर्भावो निरुपक्लिष्टचित्तस्योद्रिक्तसत्त्वस्यान्वयितयावस्थानं समाधि
६३ परिणामं त्वुच्यते पूर्वस्मात्परिणामादस्यायं विशेषः तत्र संस्कारलक्ष
णयोर्ध र्मयोरभिभवप्रादुर्भावयोः पूर्वस्य व्युत्थानसंस्कारधर्मस्य
न्यग्भावस्तूत्तरस्य निरोधसंस्कारस्वरूपस्योद्भवो न भिन्नलत्वेन स्वावस्था
नमिदं तु लक्षयोर्द्वयोरिति सर्वार्थतारूपस्य विक्षेपस्यात्यंततिरस्कारा
दनुत्पत्तिरतीतेऽध्वनि प्रवेशः सत्तदा एकाग्रतालक्षणस्य धर्मस्योद्भवो व

लेगुणाकृतंनापरित्यागमसमानंहरणमप्यस्तिननुकोयंधर्मीत्याशंक्याध
५१ र्मिणोलक्षणमाह शान्तोदिताव्यपदेश्यधर्मानुपातीधर्मी शान्ता
येकृतस्वस्वव्यापाराअ तीतेध्वनिअनुप्रविष्टाः उदितायेअनाग
तमध्वानंपरित्यज्यस्वंस्वंव्यापारंकुर्वंतिअव्यपदेश्यायेशक्तिरूपे
णस्थिताव्यपदेष्टुंनशक्यंतेयथासर्वंसर्वात्मकमित्येवमादयः
नियतःकार्यकारणरूपतयायोग्यतयावच्छिन्नाशक्तिरेवेह
धर्मशब्देनाभिधीयते तंत्रिविधमपिधर्मंयोऽनुपत

धर्मपरिणामो यथा मृल्लक्षणस्य धर्मिणः पिंडरूपधर्मपरित्यागेन घटरूपधर्मांतरस्वी ४

परिणामो व्याख्यातः एतेनैव त्रिविधोक्तेन चित्तपरिणामेन भूतेषु ।
स्थूलसूक्ष्मेष्विंद्रियेषु बुद्धिकर्मांतःकरणभेदेनावस्थितेषु धर्मलक्ष
णावस्थाभेदेन त्रिविधः परिणामः आख्यातोवगंतव्यः अवस्थितस्य
धर्मिणः पूर्वधर्मनिवृत्तौ धर्मांतरापत्तिः कारो धर्मपरिणाम इत्युक्
ते लक्षणपरिणामो यथा तस्यैव घटस्यानागताध्वपरित्यागेन वर्तमा
नाध्वस्वीकारस्तत्परित्यागो वातीताध्वपरिग्रहः अवस्थापरिणामो
यथा तस्यैव घटस्य प्रथमद्वितीययोः सदृशयोः क्षणयोरन्वयित्वेन यत्तव

स्यान्यत्वेनानात्वेहेतुर्लिंगंज्ञापकंभवतीति अयमर्थः योयंनिय
५५ तःक्रमोमृच्चूर्णान्मृत्पिंडस्ततःकपालानितेभ्यश्चघटइत्येवंरूपःप
रिदृश्यमानःपरिणामस्यान्यत्वमावेदयतितस्मिन्नेवधर्मिणियोलक्ष
52 णपरिणामस्यावस्थापरिणामस्यवाक्रमःसोप्यनेनैवन्यायेनपरिणा
मान्यत्वेगमकोवगंतव्यःसर्वएवभावाएतेनैवक्रमेणप्रतिक्षणं
परिणममानाःपरिदृश्यंतेअतःसिद्धंक्रमान्यत्वात्परिणामान्यत्वंस
र्वेषांचित्तादीनांपरिणाममाराणांकेचिद्धर्माःप्रत्यक्षेणैवोपलभ्यते

त्यनुवर्त्तते अन्वयित्वेनांगीकरोति स शांतोदिताव्यपदेश्यधर्म्मानुपा
तीधर्मीत्युच्यते यथा सुवर्णे मुद्रिकारूपधर्म्मपरित्यागेन स्वस्तिकरूप
धर्म्मांतरपरिग्रहे सुवर्णरूपतयानुवर्त्तमानेषुतेषुधर्म्मेषुकथंचित्भि
न्नेषु धर्मिरूपतया सामान्यात्मना धर्म्मरूपतया विशेषात्मना स्थितमनु
पा:त्वित्वेनावभासते एकस्य धर्मिण: कथमनेके परिणाम इत्याशंकाम
पनेतुमाह क्रमान्यत्वं परिणामान्यत्वे हेतुः धर्म्माणामुक्तलक्षणानां
यः क्रमस्तस्य प्रतिक्षणमन्यत्वं परिदृश्यमानं परिणामस्योक्तलक्षण

निस्संबंध्यापारंश्चिधायातीतमध्याने प्रविष्फतीत्येवं परिहृतविक्षेपतयायदं
संयमं करोति तदा यत् किंचिदतिक्रांतमनुत्पन्नं वा तत्सर्वं योगी नाति जा२
५६ यतश्चित्तस्य प्रख्यारूपत्वात् प्रकाशरूपत्वात् सर्वार्थग्रहणसामर्थ्यमविद्या
दिभिर्विक्षेपैरुपरज्यते यदा तु तैस्तैरु पायैर्विक्षेपाः परिक्षीयन्ते तदा
निवृत्तमलस्येवादर्शस्य सर्वार्थग्रहणसामर्थ्यस्यैकाग्रतावस्थाविर्भव
तिसिद्धं तस्मात् ह शब्दार्थप्रत्ययानामितरेतराध्यासात्संकरस्तत्प्रविभाग
संयमात्सर्वभूतरुतज्ञानं शब्दश्रोत्रेन्द्रियग्राह्यो गुणः नियतक्रमवर्ण

मि२

पथासुखादयः संस्थानादयश्च केचिच्चैकांतेनानुमानगम्या यथाऽ
र्मसंस्कारशक्तिप्रभृतयः धर्मिणश्चाभिन्नरूपतया सर्वत्रानुगमंऽत्र
वीमुक्तस्य संयमस्य विषयप्रदर्शनद्वारेण सिद्धीः प्रतिपादयितुमाह । प
रिणामत्रयसंयमादतीतानागतज्ञानं धर्मलक्षणावस्थाभेदेन यत्परि
णामत्रयमुक्तं तत्र संयमात्तस्मिन्विषये पूर्वोक्तस्य संयमस्य करणाद
तीतानागतज्ञानं योगिनः समाधाविर्भवति इदमत्र तात्पर्यं अस्मिन्
धर्मिण्ययं धर्म इदं लक्षणमियमवस्थाऽनागताध्वनः समेत्य वर्तमानेऽध्व
ना१

भेदेन व्यवहरति तथा हि कोऽयमर्थः कोऽयं शब्दः किमिदं ज्ञानमिति पृष्टः
सर्वत्रैकरूपमेवोत्तरं ददाति गौरितिमपद्यैकरूपतां न प्रतिपद्यते कथ-
२७ मेकमुत्तरं ददातीति प्रयच्छति एकस्मिन् स्थितो योऽयं प्रविभाग इदं शब्दस्य ।
तत्त्वं यद्वाचकत्वं नाम इदमर्थस्य यद्वाच्यत्वं इदं ज्ञानस्य यत्प्रकाशकत्वमि-
ति प्रविभागं विधाय तस्मिन् प्रविभागे यत्संयमं करोति तस्य सर्वेषां भूता ।
नां पशुपक्षिसरीसृपादीनां यद्रुतं यः शब्दस्तत्र ज्ञानमुत्पद्यते अनेनाभि-
प्रायेणोक्तं नायं शब्दः समुच्चारित इति सर्वं जानातीति सिद्धान्तरमाह संस्कार

णात्मनानियतेवार्थप्रतिपत्त्यवच्छिन्नः यद्विवाक्रमरहितःस्फोटात्माभ्युपेति
संस्कृतबुद्धिग्राह्यउक्तम्यथापिपदस्वरूपोवाक्यस्वरूपश्चतयोरेवार्थप्रतिपत्तौ
सामर्थ्यात्तस्मादर्थोजातिगुणक्रियादिप्रत्ययोज्ञानेविषयाकारानुच्छेदवृत्तिःस
षांशब्दार्थज्ञानानांव्यवहारेतरेतराध्यासात्भिन्नानामपिबुद्धावेकरूपोपा
दानात्संकीर्णत्वंतथाहिगामानयेत्युक्तेकश्चिज्ज्ञोऽलक्षणमर्थंगोत्वजात्य
वच्छिन्नंसास्नादिमत्पिंडरूपंशब्दंचतत्वाचकंज्ञानंचतद्ग्राहकंचेत्येनैरेवाध्यव
स्यतिनत्वस्यगोशब्दोवाचकोऽयंगोशब्दस्यवाच्यस्तयोरिदंग्राहकंज्ञानमिति

दिनालिंगेनगृहीतस्ययदासंयमंकरोतितदापरकीयस्यचित्तस्यज्ञानमु
त्पद्यतेसरागमस्यचित्तंवीतरागंचेतिपरचित्तगतानेवधर्मान्जानातीत्यर्थ
५८ ःअस्यैवपरचित्तज्ञानस्यविशेषमाह॥ नचसालंबनंतस्याविषयीभूतत्वात्
तस्यपरस्ययच्चित्तंतच्चित्तंसालंबनंस्वकीयालंबनेनसहितंनशक्यतेज्ञातु
मालंबनस्यकेनचिल्लिंगेनाविषयीकृतत्वात्लिंगाच्चित्तमात्रंपरस्या
वगतंनतुनीलविषयमस्यचित्तंपीतविषयमितिवायच्चनगृहीतंतत्संयमस्यत
त्रकर्तुमशक्यत्वात्ननभवतिपरचित्तस्ययोविषयतत्रज्ञानंतस्मात्परकी

साक्षात्करणात्पूर्वजातिज्ञानं द्विविधाःचित्तस्यवासनारूपाःसंस्काराःके
चित्स्मृतिमात्रोत्पादनफलाःकेचिज्जात्यायुर्भोगलक्षणविपाकहेतवःय
थाधर्माधर्माख्याःतेषुसंस्कारेषुयदासंयमंकरोतिएवंमयासोर्थोनुभूतो
एवंमयासाक्रियानिष्पादितेतिपूर्ववृत्तम[illegible]सर्वमनुसंदधानोभावयन्प्र
बोधकमंतरेणोद्बुद्धसंस्कारःसर्वमतीतंस्मरतिक्रमेणसाक्षात्कृ
तेषुसंस्कारेषुउद्बुद्धेषुपूर्वजन्मानुभूतानपिजात्यादीन्प्रत्यक्षेणपश्यतिवृ
त्तांतरमाह प्रत्ययस्यपरचित्तज्ञानं प्रत्ययस्यपरचित्तस्यकेनचिन्मुखरागा

५६ 56

श्यते इत्यर्थः तेन ग्राह्यान्तर्धानमुक्तं एतेनैव रूपान्तर्धानोपायप्रदर्शनेन श
ब्दादीनां श्रोत्रादिग्राह्याणामंतर्धानमुक्तं वेदितव्यं सिद्ध्यंतरमाह सोपक्रमं निरु
पक्रमं च कर्म तत्संयमाद् परान्तज्ञानमरिष्टेभ्यो वा आयुर्वि
पाकं यत्पूर्वकृतं कर्म तद् द्विप्रकारं सोपक्रमं च तत्र सोपक्रमं यत् फलजन
नाय सहोपक्रमेण कार्यकरणाभिमुख्येन वर्त्तते यथोष्णप्रदेशे प्रसारित
मार्द्रवस्त्रं शीघ्रमेव शुष्यति उक्तरूपविपरीतं निरुपक्रमं यथा तदेवार्द्रवासः
संवर्तितमनुष्णदेशे चिरेण शोषमेष्यति तस्मिन् द्विविधकर्मणि संयमं करो

यंचित्तंनालंबनसहितंगृह्यतेतस्यालंबनस्यागृहीतत्वात्चित्तधर्मोऽस्तुनगृ
ह्यंतेएवंयत्तुकिमनेनालंबितमितिप्रणिधानंकरोति तदासंयमात्तद्वि
षयमपिज्ञानमुत्पद्यतेएवंसिद्ध्यंतरमाह कायरूपसंयमात्तद्ग्राह्यशक्ति
ीतदप्यं४ स्तंभेचक्षुषःप्रकाशसंयोगेंतर्धानंकायंशरीरंतस्यरूपंचक्षुर्ग्राह्योगुणस्त
स्मिन्कायेतद्रूपमितिसंयमात्तस्यरूपस्यचक्षुर्ग्राह्यत्वरूपायाशक्तेस्त
स्यांस्तंभेभावनावशात्प्रतिबंधेचक्षुःप्रकाशसंयोगेचक्षुषःप्रकाशःसत्वध
र्मस्तस्यसंयोगेतद्ग्रहणव्यापारस्याभावेयोगिनोंतर्धानंभवतिनकेनचिद्सौदृ

णज्ञानमुत्पद्यतेतथायितेषांसामान्याकारेणतत्त्वंप्रायहृयंयोगिनांपुन
६० र्नियतकालदेशतयाप्रत्यक्षवदव्यभिचारिकर्मनिमित्तंदृष्टान्तसिद्धीः प्रतिपाद
यितुमाह मैत्र्यादिषुबलानि मैत्रीकरुणामुदितोपेक्षासुयोविहितः
संयमस्तस्यबलानितासांतासांमैत्र्यादीनांसंबंधीनिप्रादुर्भवंतिमैत्रीकरु
णामुदितास्तथाप्रकर्षंगच्छंतियथासर्वस्यमित्रत्वादिकंसंपद्यतेसि
द्ध्यंतरमाह बलेषुहस्तिबलादीनिहस्त्यादिसंबंधेषुकृतसंयमस्यतद्बला
निहस्त्यादिबलानिआविर्भवंतितदयमर्थोयस्मिन्हस्तिबलेवायुवेगेवा

ति किं कर्म शीघ्रविपाकं किं चिरविपाकमिति अवधानदार्ढ्यायत्नरूपः संयमे
ज्ञानमस्योत्पद्यते अपरान्तः शरीरवियोगः तस्मिन् ज्ञानममुष्मिन् कालेऽमु
ष्मिन्देशेऽमुना मम वध्यतिइति निःसंशयं जानाति अरिष्टेभ्यो वा अरिष्टानि
त्रिविधानि आध्यात्मिकाधिभौतिकाधिदैविकभेदेन तत्राध्यात्मिकानि पिहितक
र्णो कोष्ठेभ्यो वायोर्घोषं न शृणोति इत्यादीनि आधिभौतिकान्यकस्माद्विकृत
पुरुषदर्शनादीनि आधिदैविकान्यकाण्डे एव द्रष्टुमशक्यस्वर्गादिपदार्थदर्श
नादीनि तेभ्यः शरीरवियोगकालं जानाति परयोगिनामप्यरिष्टेभ्यः प्रायो (

यमात् सूर्ये प्रकाशमये यः संयमं करोति तस्य सप्तसु भूर्भुवःस्वः प्रभृतिषु।
६१ लोकेषु यानि भुवनानि तत्संनिवेश्मानि पुराणि तेषु यथावदस्य ज्ञानमु।
त्पद्यते पूर्वस्मिन्सूत्रे मालिकप्रकाशस्यालंबनतयोक्त इह तु भौतिक इति
58 विशेषः भौतिकप्रकालंबनद्वारेणैव सिध्यंतरमाह चंद्रे ताराव्यूहज्ञान
मुत्पद्यते ताराणां ज्योतिषां यो व्यूहः विशिष्टसंनिवेशस्तस्मिन् चंद्रे कृतसं
यमस्य ज्ञानमुत्पद्यते सूर्यप्रकाशेन हततेजस्त्वात् ताराणां सूर्यस्य संय
मात्तज्ज्ञानं न शक्नोति भवितुं तस्मात् पृथगुपायोभिहितः सिध्यंतरमाह

म१

सिंहवीर्येवातन्मयीभावेनसंयमंकरोतितत्सर्वेंसां युक्तत्वात्सत्वस्यप्रा
दुर्भवतीत्यर्थंसिद्ध्यंतरमाह प्रवृत्त्यालोकन्यासात्सूक्ष्मव्यवहितविप्रकृ
ष्टज्ञानं प्रवृत्तिःविषयवतीज्योतिष्मतीचप्रागुक्तातस्यांयोसौसात्विकप्रका
२१४ शप्रसारस्तंविषयेषु निखिलेषुन्यासात्तद्वासितानांविषयानांभावनातः
सांतःकरणोप्यिंद्रियेषुप्रकृष्टशक्तितामापन्नेषुसूक्ष्मस्यपरमाण्वादेर्व्य
वहितस्यभूम्यंतर्गतस्यनिधानादेर्विप्रकृष्टस्यवामेरुपरपार्श्ववर्तिनोरसा
यनादेर्ज्ञानमुत्पद्यतेएततसमानवृत्तांतंसिद्ध्यंतरमाह भुवनज्ञानंसूर्येसं

नाभिचक्रं शरीरस्य मध्यवर्त्ति सर्वतः प्रसृतानां नाड्यादीनां मूलभूतंत
त्त्र कृतावधानस्य समग्रः संनिवेशो यथावद्भासत इति सिद्ध्यंतरमाह कंठकू
६२ पे क्षुत्पिपासानिवृत्तिः कंठे गले कूपः कंठकूपः जिह्वाया मूले जिह्वातंतोरध
59 स्तात् कूप इव कूपो गर्त्ताकारः प्रदेशः प्राणादेर्य तत्संस्पर्शात्क्षुत्पिपा
सादयः प्रादुर्भवंति तस्मिन्कृतसंयमस्य योगिनः क्षुत्पिपासादयो निव
र्तंते घंटिकाधस्तात्स्रोतसाप्याय्यमाने तस्मिन्भाविते नवंत्येवंविधा सिद्धीः सि
द्ध्यंतरमाह कूर्मनाड्यां स्थैर्यं कंठकूपस्याधस्तात् हृदा कूर्माख्या नाडी

ध्रुवेतद्गतिज्ञानं ध्रुवे निश्चले ज्योतिषां प्रधाने कृतसंयमस्य तासां ताराणां
तिः यागँ प्रत्येकं नियतकाला नियतदे शा च तस्या ज्ञानमुत्पद्यते इयं तारा इ
यं ग्रह इयता कालेनामुं राशीमिदं नक्षत्रं यास्यतीति सर्वमभिजानातीत्यर्थः
म ४ इदं कालज्ञानमस्य फलमित्युक्तं भवति बाह्याः सिद्धीः प्रतिपाद्यांतराः प्रति
पादयितुमुपक्रमते नाभिचक्रे कायव्यूहज्ञानं शरीरवर्ति नाभिसंज्ञकं
यत्षोडशारं चक्रं तस्मिन् कृतसंयमस्य योगिनः काय गतो योसौ व्यूहो विशि
ष्टरसमलधातुनाड्यादीनां अवस्थानं तत्र ज्ञानमुत्पद्यते इदमुक्तं भवति

६३

तान् सपश्यति तेक्ष्म मान्यते संभाष्यते इत्यर्थः सर्वज्ञत्वेतूपायांतरमा
ह प्रतिभाद्वा सर्वं इति निमित्तानपेक्षं मनोमात्रजन्यमविसंवादकं झ
टित्युत्पद्यमानं ज्ञानं प्रतिभा तस्यां संयमे क्रियमाणे प्रातिभं विवेकख्या
तेः पूर्वभावि तारकं ज्ञानमुदेति यथोदेष्यतः सवितुः पूर्वं प्रभा प्रादुर्भव
ति तद्वद्विवेकख्यातेः पूर्वं तारकं सर्वविषयं ज्ञानमाविर्भवति तस्मि
न् सति संयमांतरानपेक्षं सर्वं जानातीत्यर्थः सिद्ध्यंतरमाह हृदये चित्तसं
वित् हृदयं शरीरस्य प्रदेशविशेषः तस्मिन्नधोमुखस्वल्पपुंडरीकाभ्यं

तस्यां कृतसंयमस्य चेतसः स्थैर्यमुत्पद्यते तत्स्थानमनुप्रविष्टस्य चप
लतानवतीत्यर्थः । यदि वा कायस्थैर्यमुत्पद्यते तेन केनचित्स्पंदयितुं श
क्यते इत्यर्थः । सिद्ध्यंतरमाह मूर्द्धज्योतिषि सिद्धदर्शनम् शिरः कपाले ब्रह्म
रंध्राख्यं छिद्रं प्रकाशाधारत्वाज्ज्योतिः । यथा गृहाभ्यंतरस्थस्य मणेः प्रसर
न्ती प्रभा कुंचिताविवरप्रदेशे संघटते तथा हृदयस्थः सात्विकप्रकाशः प्रसृतः
तत्र संपीडितत्वं भजते तेन तत्कृतसंयमस्य ये द्यावापृथिव्योरंतरालवर्तिनः
सिद्धा दिव्याः पुरुषास्तेषामितरप्राणिभिरदृश्यानां तस्य दर्शनं भवति

न्तोयः सत्वस्य स्वार्थे नैरपेक्ष्योपरार्थः पुरुषार्थे तस्मान्योयःस्वार्थे पुरुष
स्वरूपमात्रावलंबनः परित्यक्ताहंकारे सत्वे याचिच्छायासंक्रांतिस्तत्र कृ
तसंयमस्य पुरुषविषयं ज्ञानमुत्पद्यते तदेवंरूपं स्वालंबनं ज्ञानं सत्वा।
सत्वनिष्ठं पुरुषो जानाति न पुनः पुरुषो ज्ञानस्य विषयभावमापद्यते ज्ञात॥
ज्ञेयत्वापत्तेः ज्ञातृज्ञेययोरत्यंतविरोधात् अस्यैव संयमस्य फलमाह
ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायंते ततः पुरुषसंयमादभ्य
स्यमानाद्व्युत्थितस्यापि ज्ञानानि जायंते तत्र प्रातिभं पूर्वोक्तं ज्ञानं तस्माद्वि।

तदेतत्करणस्यास्थानं तत्र कृतसंयमस्य स्वपरचित्तज्ञानमुत्पद्यते स्व।
चित्तगताः सर्वा वासनाः परचित्तगतांश्च रागादीन् जानातीत्यर्थः ॥ सिद्ध्यंत
रमाह सत्त्वपुरुषयोरत्यंतासंकीर्णयोः प्रत्ययाविशेषो भोगः परार्थान्य
स्वार्थसंयमात्पुरुषज्ञानं सत्त्वं प्रकाशसुखात्मकं प्राधानिकं परिणा
मविशेषः पुरुषो भोक्तृ अधिष्ठातृरूपः तयोर्भोग्यभोक्तृरूपत्वात् चेतनाचेत
पा२ नत्वात् अत्यंतासंकीर्णत्वं भिन्नत्वमित्यर्थः तयोर्यः प्रत्ययस्याविशेषो भेदे
नाप्रतिभासनं तस्मात्सत्त्वस्यैव कर्तृतामत्यप्रतयासुखदुःखसंवित्सा

भाषया घ्राणेंद्रियमुच्यते वर्त्तते गंधविषयं इति कृत्वा ह्रते घ्राणेंद्रिया
६५ त् जाता वार्त्ता गंधसंवित्तिं तस्यां प्रकृष्यमाणायां दिव्यो गंधोनुभूयते एते
षां फल विशेषाणां विषयविनागमाह । ते समाधावुपसर्गा व्युत्थाने
सिद्धयः ते प्राक् उक्ताः प्रतिपादिताः फलविशेषाः समाधेः प्रकर्षं गच्छत उप
62 सर्गा उपद्रवा विघ्नकारिणः तद्वह हर्षविस्मयादिकरणेन समाधि शि
थिलीभवति व्युत्थाने पुनर्व्यवहारदशायां विशिष्टफलदायकत्वात्सि
द्धयो भवंति सिद्ध्यंतरमाह । बंधकारणशैथिल्यात्प्रचारसंवेदनाच्च चि

र्भावात्स्मृत्यादिकमर्थं पपूपतिष्ठावगोष्ठ्योरिन्द्रियजन्यं ज्ञानं तस्माच्छ्रुप
कृष्टं दिव्यो द्विविधं नवं प्रकृष्टं जानातीति वेदनं स्पर्शनेन्द्रियजं ज्ञानं विद्यते अ
नेनेति कृत्वा तां विन्यासं नयाम्यवक्षिप्यते तस्मात् दिव्यस्पर्शविषयं
ज्ञानमुत्पद्यते आदर्शश्चक्षुरिन्द्रियजं ज्ञानं आसमंतात् दृश्यते अ
नुभूयते रूपमनेनेति कृत्वा तस्य प्रकर्षात् दिव्यरूपज्ञानमुत्पद्यते आ
स्वादो रसनेन्द्रियजं ज्ञानं आस्वाद्यते अनेनेति कृत्वा तस्मिन् प्रकृष्टे
दिव्यरससंविदुपजायते वार्ता गंधसंवित्तिं वृत्ति श्रद्धेन तां निकायपरि

त्वापरकीयंशरीरंमृतंजीवत्तशरीरंवाचित्तसंचारद्वारेणप्रविशति
६६ चित्तंचपरशरीरेप्रविशदिंद्रियाण्यनुवर्त्ततेमधुकरमिवमक्षिका
यतःपरशरीरप्रविष्टोयोगीस्वशरीरवत्तेनव्यवहरतेयतोव्याप
कयोश्चित्तपुरुषयोर्भोगसंकोचेकारणंकर्माभूत्तच्चेत्समाधिनाक्षि
63 प्तंतदास्वातंत्र्यात्सर्वत्रैवभोगनिष्पत्तिःसिद्ध्यंतरमाह उदानजया
क२ ज्जलकंटपंकादिष्वसंगउत्क्रांतिश्च समस्तानामिंद्रियाणांतुषज्वा
लावद्यायुगपदुत्थितावृत्तिःसाजीवनशब्दवाच्यातस्याःक्रियाभेदा

तस्य परशरीरावेशः व्यापकत्वादात्मसत्त्वयोर्नियतकर्मवशादे
व शरीरांतर्गतयोरेव भोक्तृभोग्यभावेन यत्संवेदनमुपजायते स
एव शरीरे बंध इत्युच्यते यदा समाधिवशात्तद्बंधकारणं धर्माधर्मा
त्मकं कर्म शिथिलं भवति तानवर्मपद्यते चित्तस्य योसौ प्रचारो हृदय
प्रदेशादिंद्रियद्वारेण विषयाभिमुख्येन प्रसरस्तस्य संवेदनं ज्ञानमियं
चित्तवहा नाडी अनया चित्तं वहति इयं च रसप्राणादिवहाभ्यो ना
डीभ्यो विलक्षणा इति स्वपरशरीरयोर्यदा शरीरसंचारं जानाति त

ह समानजयाज्ज्वलनं अग्निमावेशमावस्थितस्य समानाख्यस्य वा

६७ योर्जयात्संयमेन वशीकारान्निरावरणस्याग्नेरुद्भूतत्वात्तेजसा ज्वलन्नि

व योगी प्रतिभातीति सिद्ध्यन्तरमाह श्रोत्राकाशयोः संबंधसंयमाद्दिव्यं श्रो

त्रं श्रोत्रं शब्दग्राहकमाहंकारिकमिन्द्रियमाकाशं व्योमशब्दतन्मात्रका

र्यं तयोः संबंधो देशदेशिभावलक्षणस्तस्मिन्कृतसंयमस्य योगिनो दि

व्यं श्रोत्रं प्रवर्तते युगपत्सूक्ष्मव्यवहितविप्रकृष्टशब्दग्रहणसमर्थं भ

वतीत्यर्थः सिद्ध्यन्तरमाह कायाकाशयोः संबंधसंयमाल्लघुतूलसमा

तस्थाणादिभिः संज्ञाभिर्व्यपदेश्यं तत्र हृद्देशान्मुखनासिकाद्वारेणवा
योः प्रणयनात्प्राण इत्युच्यते नाभिप्रदेशात्पादांगुष्ठपर्यंतमपनय
दपानो नाभिप्रदेशं परिवेष्ट्य समनयनात्समानः कृकाटिकाप्रदेशा
च्छिरोवृत्तिरुन्नयनादुदानो व्याप्यनयनात्सर्वशरीरव्यापी व्यानः उ
दानस्य संयमद्वारेणजयादितरेषांवायूनांनिरोधादूर्ध्वगतिस्तेन जलेम
हानद्यादौ महति वा कर्दमे तीक्ष्णेषु कंटकेषु वा । न सज्जते अतिलघुत्वा
त्तूलपिंडवत् जलादावनिमज्जन्नपरि नगच्छतीत्यर्थः सिद्धांतरत्ना

ना१

सात्त्विकस्यचित्तस्ययःप्रकाशःतस्ययदावरणंक्लेशकर्मादितस्यक्षयः॥

ततस्तस्यांकृतात्संयमात्प्रकाशावरणक्षयः।प्रविलयोनवृत्तिस्त्रय।
९८ मर्थेशरीराहंकारेसतियामनसोवहिर्वृत्तिःसाकल्पितेत्युच्यतेयदा
पुनःशरीराहंकारस्मावंपरित्यज्यस्वातंत्र्येणामनसोवृत्तिःविदेहासाक
65 ल्पितातस्यांसंयमाद्योगिनांसर्वेचित्तमलाःक्षीयंतेततस्त्वेवंपूर्वोक्तविषयाः
परांतविषयामध्यमावाक्सिद्धीःप्रतिपाद्यानंतरंसर्वेचभुवनज्ञाना।
दिरूपावाह्याःकायव्यूहादिरूपाश्चान्तराःपरिकर्मणास्यंदमूतास्त्रमैत्र्या
दिसुबलानीत्येवमाद्यासमाध्युपयोगिनीश्चांतःकरणवहिःकरणलक्ष

पतेः॥आकाशगमने कायःपांचभौतिकंशरीरंतस्याकाशेनावकाश।
दायकेनयःसंबंधःतत्रसंयमंविधायलघुनितूलादौसमापत्तिंतन्मयी
भावलक्षणांविधायप्राप्तात्यंतलघुभावोयोगीप्रथमंयथारुचिजे
लेसंचरन्क्रमेणोर्णनाभितंतुजालेनसंचरमाणआदित्यरश्मिभिश्च
विहरन्यथेष्टमाकाशेनगच्छतीतिसिद्ध्यंतरमाह बहिरकल्पितावृत्ति
र्महाविदेहाततःप्रकाशावरणक्षयः शरीराद्बहिर्यामनसःशरीरनैरपे
क्ष्येणवृत्तिःसामहाविदेहानामनिर्गतशरीराहंकारदार्ढ्यद्वारेणोच्यते

त्राकर्मवंति । यथापरमाणुत्वंप्राप्ते कंसादिकान्यतैःप्रविश्यन्ति एवंसं
७० वेत्रयोऽप्येते । अणिमादयोऽष्टौगुणाः महासिद्धयइतित्वनेकायसं
पद्रूपमाणितांप्राप्नोति तद्धर्मानभिघातश्च तस्यकायस्यये धर्मा रू
66 पादयः तेषामनभिघातो नाशो नास्य कुतश्चिदपि भवति नास्यरूपमग्नि
र्दहति न च वायुः शोषयतीत्यादि योऽप्येकायसंपदमाह ॥ रूपलावण्यब
लवज्रसंहननत्वादीनि कायसंपत् रूपलावण्यबलानि प्रसिद्धानि वज्र
संहननं वज्रवत्कठिना संहतिरस्य शरीरेण वतीत्यर्थः इति कायस्या

निघातश्च ॥ अणिमा परमाणुरूपतापत्तिः महिमा महत्वं लघिमा तू
लपिंडवल्लघुत्वप्राप्तिः गरिमा गुरुत्वं प्राप्तिरंगुल्यग्रे चंद्रादिस्प
र्शनशक्तिः प्राकाम्यमिच्छानभिघातः शरीरांतःकरणेईशित्वं सर्वत्रप्र
विष्णुता वशित्वं सर्वाण्येव भूतानि अनुगामित्वात् तदुक्तं नातिक्रमं
ति यत्र कामावसायो यस्मिन् विषयेस्य कामः इच्छा भवति तस्मिन्वि
षये योगिनो व्यवसायो भवति विषयस्वीकारद्वारेणाभिलाषसमाप्तिप
र्यंतं नयतीत्यर्थः ते एते अणिमाद्याः समाध्युपयोगिनस्तज्जयाद्योगिनः

विर्मुक्तगुणसंपत्‌एवंभूतजयमभिधायप्राप्तक्रमिकस्येंद्रियजयमा
ह ॥ ग्रहणस्वरूपास्मितान्वयार्थवत्त्वसंयमादिंद्रियजयः ॥ ग्रहणमिं
द्रियाणां विषयाभिमुखीवृत्तिः स्वरूपंसामान्येनप्रकाशत्वंअस्मिता
हंकारानुगुणागतः अन्वयार्थवत्त्वेचपूर्ववत्‌एतेषामिंद्रियाणा
मवस्थापंचकेपूर्ववत्‌संयमंकृत्वाइंद्रियजयोभवतितस्यफलमाह
॥ ततोमनोजवित्वंविकरणभावःप्रधानजयश्च ॥ शरीरस्यमनोवदनुत्त
मनो १ मोगतिलाभोमनोजवित्वंकायनिरपेक्षाणामिंद्रियाणांवृत्तिलाभोविकरण

भावाः सर्वे वशित्वं प्रधानजयः ॥ एतास्सिद्धयो जितेंद्रियस्य प्रादुर्भवंति ता
स्वास्मिन् प्रणस्त्वे मधुप्रतीका इत्युच्यते यथा मधुन एकदेशोपि स्वदते
एवं प्रत्येकमेताः सिद्धयस्स्वदंत इति मधुप्रतीकाः इंद्रियजयमभिधा
यांतःकरणजयमाह सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठा
तृत्वं सर्वज्ञातृत्वं च ॥ तस्मिन् शुद्धे सात्त्विके परिणामे कृतसंयमस्य
सत्त्वपुरुषयोरुत्पद्यते विवेकख्यातिर्गुणानां कर्तृत्वाभिमानशि
थिलीभावरूपा यातन्माहात्म्यात्तत्रैव स्थितस्य योगिनः सर्वभावाधि

पुरुषस्य गुणानामधिकारपरिसमाप्तेः स्वरूपप्रतिष्ठत्वं तस्मिन्नेव समा
धौ स्थितस्योपायमाह ॥ स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्टप्रसं
गात् ॥ चत्वारो योगिनो भवंति तत्राभ्यासवान् प्रवृत्तमात्रज्योतिः ॥ प्रथमः
ऋतंभरप्रज्ञो द्वितीयः ॥ भूतेंद्रियजयी तृतीयः ॥ अतिक्रांतभावनीयश्चतु
र्थः तस्य चतुर्थस्य समाधेः ॥ प्राप्तसप्तविधप्रांतभूमिप्रज्ञस्यांत्यामधुमती
संज्ञां भूमिकां साक्षात्कुर्वतः स्थानिनो देवा उपनिमंत्रयितारो भवंति दिव्य
स्त्रीरसायनादिकं ढौकयंति इति तस्मिन् स्थान्युपनिमंत्रणे नानेन संगः कर्तव्यो

ष्ठातृत्वं सर्वज्ञातृत्वं च समाधिर्वृति सर्वेषां गुणपरिणामानां भावानां स्वा
मितयाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव शान्तोदिताव्यपदेश्यधर्मित्वेन
स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं येषां चास्मिन् शास्त्रे पर
स्यां वशीकारसंज्ञायां विशोकानामसिद्धिरित्यतः क्रमेण भूमिकांत
रमाहृतवैराग्यादपि दोषबीजक्षये कैवल्यं ॥ तस्यामपि विशोकायां
सिद्धौ यदा वैराग्यमुत्पद्यते योगिनस्तदा तस्माद्दोषाणां रागादीनां यद्बी
जमविद्यादयस्तस्य क्षये निर्मलत्वेन कैवल्यं प्राप्नोतीति कीदृशश्च निवृत्तिः

७३ स्मात्सर्वः। इत्येवंविधे क्षमे कृतसंयमस्य तस्य सूक्ष्मेपि क्षणक्रमे यदाभ
वति साक्षात्कारस्तदा अन्यदपि सूक्ष्मं महदादि साक्षात्करोतीति वि
वेकज्ञानोत्पत्तिः अस्यैव संयमस्य विषयविवेकोपयोगमाह॥ जाति
लक्षणदेशैरन्यतानवच्छेदात्तुल्ययोस्ततः प्रतिपत्तिः॥ पदार्थानां
भेदहेतवो जातिलक्षणदेशा भवन्ति क्वचिद्भेदहेतुर्जातिः यथा गौर
यं महिषोयमिति जात्या तुल्ययोर्लक्षणं भेदहेतुः इयं कर्बुरा इयम
रुणा इति जात्या लक्षणेन चाभिन्नयोर्भेदहेतुर्देशो दृष्टः यथा तुल्य

नापि स्मयः संगतिकरणेतु नर्विषयभोगप॥तिस्मयकरणे कृतकृत्य
मात्मानं मन्यमानो न समाधावुत्सहते अतः संगस्मययोस्तेन वर्जनं कर्त्त
व्यं अस्यामेव फलमन्तरायो विवेकख्यातौ पूर्वोक्तसंयमव्यतिरक्तमुपायां
तरमाह ॥ क्षणतत्क्रमयोः संयमाद्विवेकजं ज्ञानं ॥ क्षणः सर्वांत्यः
कालावयवो यस्य कलांशविभक्तुं न शक्यते तथाविधानां कालक्षणानां
यः क्रमः पौर्वापर्येण परिणामस्तत्र संयमात्प्राप्तक्त विवेकजं ज्ञानमु
त्पद्यते अयमर्थः अयं कालक्षणो अमुष्मात्कालक्षणात् उत्तरो यम

७५ मंचेति विवेकजं ज्ञानं । उक्तसंयमबलादंत्यायां भूमिकायामुत्पन्नं ज्ञानं
७४ तारयत्यगाधात्संसारपयोधेर्योगिनमित्यान्वार्थिक्या संज्ञया तारकमि
त्युच्यते अस्य विषयमाह ॥ सर्वविषयमिति ॥ सर्वाणि तत्त्वानि महदा
70 दीनि विषयोऽस्येति सर्वविषयं सर्वाभिरवस्थाभिः स्थूलसूक्ष्मादिभेदे
नतैस्तैः परिणामैः सर्वेण प्रकारेणावस्थितानि विषयोऽस्येति सर्वथा
विषयं स्वभावांतरमाह ॥ अक्रमं चेति निःशेषं नानावस्थापरिणा
मात्मकं भावग्रहणेनास्य क्रमो विद्यत इत्यक्रमं सर्वं करतलामल

परिमाणयोरामलकयोर्भिन्नदेशस्थयोः यत्र पुनर्भेदो नावधारयितुं
न शक्यते ॥ यथा एकदेशस्थयोः शुक्लयोः पार्थिवयोः । परमाण्वोस्तथा
विधे विषयेन्हेहायकृतसंयमस्य यदा भेदेन ज्ञानमुपजायते तदा तद्
भ्यासात्सूक्ष्माण्यपि तत्त्वानि भेदेन प्रतिपद्यते एतदुक्तं भवति यत्र
केनचिदुपायेन भेदेनावधारयितुं शक्यते तत्र संयमात् भवत्येव
पत्तिः २ भेदप्रति तः सूक्ष्माणां तत्त्वानामुक्तस्य विवेकजन्यज्ञानस्य संज्ञां वि
षयं स्वभावं च व्याख्यातुमाह ॥ तारकं सर्वविषयं सर्वथाविषयमक्र

कवदुपगतं पश्यतीत्यर्थः । अस्माच्च विवेकजात्तारकात् किं भवती
त्याह ॥ सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यं सत्वपुरुषयोरुक्तलक्षणयो
योः शुद्धिसाम्ये कैवल्यं चित्तसत्वस्य सर्वकर्तृत्वाभिमाननिवृत्त्या स्व
कारणेनुप्रवेशः शुद्धिः पुरुषस्य शुद्धिरुपचरितभोगाभावः ॥ इति
द्वयोः समानायां शुद्धौ पुरुषस्य कैवल्यमुत्पद्यते मोक्षो भवतीत्यर्थः
तदेवमन्तरङ्गयोगाङ्गत्रयमभिधाय तस्य च संयमसंज्ञां कृत्वा संयम
स्य च विषयप्रदर्शनार्थं परिणामत्रयमुपपाद्य संयमबलोत्पद्यमा

नाः पूर्वांतापरांतमध्यभावाः सिद्धीरूपद्रष्टौ परमपुरुषार्थसिद्धयेयथा
क्रममेवास्यासहितंमृतज्जयेंद्रियजयसत्त्वजयोऽत्रवा व्याख्यायविवेक
जज्ञानोत्पत्तयेतांस्तानुपायानुपन्यस्यतारकस्यसर्वसमाध्यवस्थाप
र्यंतभवस्यस्वरूपमभिधायतत्समापतेः॥ क्रमाधिकारस्यचित्तसत्व
स्यस्वकारणेनुप्रवेशात्कैवल्यमुत्पद्यतेइति अभिहितंनिर्णीतो
विभूतिपादस्तृतीयः॥३॥ इतिश्रीमहाराजाधिराजश्रीभोजविरचि
तायांराजमार्तंडाभिधायांपातंजलयोगशास्त्रवृत्तौविभूति

ादस्तृतीयोपादः ॥ ३ ॥ यदाज्ञयैवकैवल्यंविनोपायैःप्रजायतेतमेव
भजमीशानंचिदानंदमयंस्तुमः ॥ १ ॥ इदानींविप्रतिपत्तिसमुत्थभ्रांतिनि
राकरणेनयुक्त्याकैवल्यस्वरूपावस्थापनायकैवल्यपादोयमार
भ्यतेतत्रयाःपूर्वमुक्ताःसिद्धयस्तासांनानाविधत्वंजन्मादिकारणप्र
तिपादनद्वारेणैवंबोधयतियद्वियाएताःसिद्धयस्ताःपूर्वजन्माभ्यस्त
समाधिबलाज्जन्मादिनिमित्तमात्रत्वेनाश्रित्यप्रवर्तंतेततश्चानेकभ
वाभ्यस्यसमाधेर्व्वृत्तिरस्तीत्याश्वासोत्पादनायसमाधिसिद्धेश्च

॥न्यख्यापनायकैवल्यप्रयोगार्थमाह॥ जन्मौषधिमंत्रतपःसमाधिजाः
द्धयः॥ काश्चनजन्मनिमित्ताएव सिद्धयः यथापक्ष्यादीनामाकाशगमना
दि॥ यथा वा कपिलमहर्षिप्रभृतीनांजन्मसमनंतरमेवोपजायमानाज्ञा
नादयः सांसिद्धिकागुणाः॥ औषधसिद्धयो यथा पातालाद्यैरसायनाद्युपयो
गान्मंत्रसिद्धिर्यथा मंत्रजपात्केषांचिदाकाशगमनादि॥ तपःसिद्धिर्यथा वि
श्वामित्रादीनां॥ समाधिसिद्धिर्यथा प्राक्प्रतिपादिताः॥ एताः सिद्धयः पूर्वज
न्मनिक्षपितक्लेशानामेवोपजायते तस्मात्समाधिसिद्धावेवान्यासां सि

प्रकृतीनां वरणभेदस्तु ततः क्षेत्रिकवत् निमित्तं धर्मादि तत् प्रकृतीनामर्थां
७७ तरपरिणामेन प्रयोजकं नहि कार्येण कारणं प्रवर्त्यते कुतस्तर्हि तस्य धर्मादे
र्व्यापार इत्याह ॥ वरणभेदस्तु ततः क्षेत्रिकवत् ॥ ततस्तस्मादनुष्ठीयमानात्
धर्मादेर्यद्वरणमावरणकमधर्मादि तस्यैव विरोधित्वात् भेदः क्षयः क्रियते
तस्मिन्प्रतिबंधके क्षीणे प्रकृतयः स्वयमभिमतकार्ये प्रभवंति दृष्टांतमाह
क्षेत्रिकवत् यथा क्षेत्रिकः कृषीवलः केदारात्केदारं जलं निनीषुर्जलस्य प्रतिबं
धकावरणमात्रभेदमात्रं करोति तस्मिन्भिन्ने जलं स्वयमेव प्रसरद्रूपं परि

लं२२

[illegible]नां समाधिरेव जन्मांतराभ्यस्तः कारणं मंत्रादीनि निमित्तमात्राणि ननु
नंदीश्वरादीनां जात्यादिपरिणामोऽस्मिन्नेव जन्मनि दृश्यते तत्कथं जन्मां
तराभ्यस्तस्य समाधेः कारणत्वमुच्यत इत्याशंक्याह ॥ जात्यंतरपरिणामः
प्रकृत्यापूरात् । योयमिह जन्मनि नंदीश्वरादीनां जात्यादिपरिणामः । स
[illegible]त्य एव प्रकृत्यापूरणात् प्रकृतयोऽस्मिन्नेव जन्मनि विकारानापूरयं
२ [illegible]त्यंतरस्याकारेण परिणमयंति ननु च धर्माधर्मादयस्तत्र क्रियमाणा उप
व[illegible]न्ते तत्कथं प्रकृतीनामापूरणे कारणत्वमित्याह ॥ निमित्तमप्रयोजकं

न नभिन्नमतत्त्वं अयमर्थो यथात्मीये शरीरे मनश्चक्षुः पाणादीनि यथेच्छं
७८ प्रेरयत्यधिष्ठातृत्वेन यथा कायांतरग्रहणप्रवीति जन्मादिप्रभवत्वात् सिद्धी
नां चित्तमपि तस्य नवं पंचविधमेवत तो जन्मप्रभवा द्वितात् समाधिप्रभव दी२
स्य वैलक्षण्यमाह । तत्र ध्यानजमनाशयं ध्यानजं समाधिजं यत् । चित्तं तस्य
च सुमध्ये अनाशयं कर्मवासनादिरहितमित्यर्थः यथेतरचित्तेभ्यो यो
गिनश्चित्तं क्लेशादिरहितं विलक्षणं तथा कर्मापि विलक्षणमित्याह
कर्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषां ॥ शुभफलदं कर्म यागादिशु

णामंगस्फातिं न तु जलप्रसारणे । तस्य कश्चित्प्रयत्न एवं धर्मादेवोद्भवं यदा
साक्षात्कृततत्त्वस्य योगिनः युगपत्कर्मफलोपभोगायात्मीयनिरतिश
यविभूत्यनुभवात् युगपदनेकशरीरनिर्माणेच्छा जायते तदा कुतस्तानि चि
त्तानि प्रभवन्तीत्याह । निर्माणचित्तान्यस्मितामात्रात् योगिनः । स्वयं नि
र्मितेषु कायेषु परिणामं तेन तु बहूनां चित्तानां भिन्नाभिप्रायत्वात् नैक
कार्यकर्तृत्वं स्यादित्याह । प्रवृत्तिभेदे प्रयोजकं चित्तमेकमनेकेषां तेषां प्रवृ
त्तिभेदे व्यापारनानात्वे एकं योगिनश्चित्तं प्रयोजकं प्रेरकमधिष्ठातृत्वेन ते

७५ 75

रणो यादृक्शरीरमोङ्कृदेवतिर्यैङ्मिरेन तस्य विपाकस्य याः अनुगुणास्तदनुरू
पावासनास्तासामेव तस्माद्ब्यक्तिर्वासनानां भवति अयमर्थः येनकर्मणा
पूर्वदेवादिशरीरमारब्धं जात्यंतरशतव्यवधानेन पुनस्तथाविधस्यैव श
रीरस्यारंभे तदनुरूपा एव स्मृतिफला वासना प्रकटा भवंति लोकांतरेष्ववा
र्थेषु तस्य स्मृत्यादयो जायंते इतरास्त्वसंत्योपि न्यग्भूतास्तिष्ठंति न तस्यां द
शायां नारकादिशरीरोपभोगजन्यवासनाव्यक्तिमायांति आसामेव वा
सनानां कार्यकारणानुपपत्तिमाशंक्य समर्थयितुमाह जातिदेशकाल

लोऽश्रुतफलं दृष्टमहत्मादिकर्मसौमुनयसं क्षीणं स्तु क्लक्लमेतत्रस्तु क्लकर्म
विचक्षणानां दानतपःस्वाध्यायादिमतां पुरुषाणां कृष्णकर्मनारकिणां शु
क्लकृष्णं मनुष्याणां योगिनां तु संन्यासवतामेवंविधं कर्म क्रियमाणं फल
त्यागानुसंधानेनैवानुष्ठानान्न किंचित्फलमारभते अस्यैव कर्मणः फल
माहतत्तत्त्रिविपाकानुगुणानामेवाभिव्यक्तिर्वासनानां इह हि त्रिविधा कर्म
वासना स्मृतिमात्रफला जात्यायुर्भोगफलाश्च तत्र जात्यायुर्भोगफला एका
नेकजन्मभवा इत्यनेन पूर्वमेव कृतनिर्णयाः स्मृतिमात्रफलास्तु ततः कर्म

वासनारूपःसंस्कारःसमुत्पद्यतेसचस्वर्गनरकादीनांफलानामंकुरीभावक
र्मणांयागादीनांशक्तिरूपतयावस्थानंकर्तुर्वातथाविधभोगभोक्तृत्वरू
पसामर्थ्यंततःसंस्कारात्स्मृतिःस्मृतेश्चसुखदुःखोपभोगस्तदनुभवाच्चपुन
रपिसंस्कारस्मृत्यादयःएवंचयस्यस्मृतिसंस्काराद्योभिन्नाःतस्यानंतर्याभा
वेनदुर्लभःकार्यकारणभावोऽस्माकंतुअनुभवएवसंस्कारीभवतिसंस्कार
श्चस्मृतिरूपतयापरिणमतेततश्चएकस्यैवचित्तस्यानुसंधातृत्वेनस्थितत्वात्
कार्यकारणभावोनदुर्घटःभवत्वानंतर्येकार्यकारणभावश्चवासनानांयद्य

व्यवहितानामप्यानंतर्यं स्मृतिसंस्कारयोरेकरूपत्वात् इह नानायोनि
भ्रमतां संसारिणां कांचिद्योनिमनुभूय यदा योन्यंतरसहस्रव्यवधाने
न पुनस्तामेव योनिं प्रतिपद्यते तदा तस्याः पूर्वानुभूतायां योनौ तथाविधशरी
राद्यभिव्यंजकापेक्षा वासनायाः प्रकटीभूताः आसंस्तथाविधव्यंजकाभावा
त्तिरोभूताः पुनस्तथाविधव्यंजकशरीरादिलाभे प्रकटीभवंति जातिदेशका
लव्यवधानेपि तासां स्वानुरूपस्मृत्यादिफलसाधने आनंतर्यं नैरंतर्यमेव कु
तः स्मृतिसंस्कारयोरेकरूपत्वात् तथाहि अनुष्ठीयमानात् कर्मणश्चित्तसत्वे

८१

77

वार्यंते अनुभवसंस्कारास्त्वनुविध्वंसंकोचविकाशधर्मिचितं तत्तदभिव्यंजकं
विपाकलाभान्नत्फलरूपतयापरिणमते इत्यर्थः आसामानंत्यात् हानं क
थं संभवति इत्याशंक्य हानोपायमाह हेतुफलाश्रयालंवनैः संगृहीतत्वा
देषामभावे तदभावः वासनानामनंतरानुभवो हेतुस्तस्यापि अनुभवस्य
रागादयस्तेषामविद्या इति साक्षात्पारंपर्येण च हेतुः फलं शरीरादिः स्मृ
त्यादिश्च आश्रयो बुद्धिसत्वं आलंवनं यदेवानुभवस्य तदेव वासनानांस्त्र
तस्तैर्हेतुफलाश्रयालंवनैरनंतानामपि वासनानां संगृहीतत्वात्तेषां हे

तु प्रथममेवानुभवः प्रवर्तेत तर्हि किं वासनानामिति कः उत्तनिर्निमित्तक
इति शंकामपनेतुमाह ॥ तासामनादित्वमाशिषो नित्यत्वात् । तासां वास
नानामनादित्वं न विद्यते आदिर्यासां तासां भावस्तत्त्वमासामादिर्नास्तीत्य
र्थः कुत इत्यत आह ॥ आशिषो नित्यत्वात् येयमाशा महामोहरूपा सदै
व सुखसाधनानि मे भूयासुः कामानतेर्मे मवियोगो भूयादिति यः संकल्प
विशेषो वासनानां कारणं तस्य नित्यत्वात् ॥ अनादित्वादित्यर्थः तदुक्तं भव
तिकारणस्य संनिहितत्वात् अनुभवसंस्कारादीनां कार्याणां प्रवृत्तिः केन

च्यक्रस्त्रित्यवतेतिमतामपिविरोधात्नाभावसंबंधोस्तियस्वरूपेणलक्षणस
ताकंतत्कथंनिरूपाख्यतामभावरूपतांभजतेनविरुद्धंस्वरूपंस्वीकरो
८२ तीत्यर्थःतस्मात्सतांना शसंभवादसतांचोत्पत्त्यसंभवात्नैक्तेद्वे
78 म्मौविपरिणममानोधर्मीसदैवैकरूपतयैवावतिष्ठतेधर्म्मास्त्वध्व
कत्वेनत्रैकाल्यत्वेनव्यवस्थिताःस्वस्मिन्स्वस्मिन्नध्वनिव्यवस्थिता
नस्वरूपंत्यजंतिवर्तमानेऽध्वनिव्यवस्थिताःकेवलंयोग्यतांभजंतेन
स्माद्धर्मिणोभेदातीतानागताध्वभेदस्तेनैवरूपेणाद्वकार्यकारणभा

तुल्यादीनामभावे ज्ञानयोगाभ्यां दग्धवीजकल्पत्वेवि हते निर्मलत्वात्तन्नवा
सनाघ्रातेहं यांति न कार्यमारभंत इति तासामभावः ननु घ्रतिह्नां चितस्य
नश्वरत्वोपलब्धेर्वासनानां तत्फलानां च कार्यकारणभावेनायुगपज्जवि
त्वाद्देकस्य मेकत्वमित्याशंक्य चरकत्वसमर्थनायाह ॥ अतीतानागतं स्व
रूपं नास्त्यध्वभेदात्तद्धर्माणां ॥ इहात्यंतंर्सतां भावानामुत्पत्तिर्न्नयुक्तिमती
तेषां सत्त्वसंबंधायोगान्नहि शशविषाणादीनां क्वचिदपि सत्वसंबंधो दृष्टः
निरूपाख्ये च कार्ये किमुद्दिश्य कारणानि प्रवर्तेरन्नहि विषयमालो

वस्तुसाम्ये चित्तभेदात्समानेपि वस्तुनि स्त्र्यादौ उपलभ्यमाने नानाप्रमातॄणां चि
त्तस्य भेदः सुखदुःखमोहरूपतया समुपलभ्यते तथा ह्येकस्यां रूपलावण्यव
त्यां योषिति उपलभ्यमानायां सरागस्य सुखमुत्पद्यते सपत्न्यास्तु द्वेषः परिव्रा
जकादेर्घृणा इत्येकस्मिन्नपि वस्तुनि नानाविधचित्तोदयात्कथं चित्तकार्यत्वं व
स्तुनः एकचित्तकार्यत्वे वस्त्वेकरूपतयैव भासेत् किं च चित्तकार्यत्वे वस्तुनो यदा
यस्य चित्तस्य यद्वस्तु कार्यं तस्मिन्नर्थांतरव्यासक्ते चित्ते तद्वस्तु न किंचित्स्यात्
भवत्विति चेन्न तदेव कथमन्यैर्वज्ञाभिरुपलभ्येत उपलभ्यते च तस्मान्न चित्त

२८४

कार्येऽप्ययुगपत्त्वक्रमिः सोर्थः क्रियते तदावक्रमिनिर्मितस्यान्यसामर्थ्यस्यैकनि
र्मिताद्धेलक्षणांस्यात् यदि वैलक्षण्यं नेष्यते तदा कारणभेदे सति कार्यभेदस्य
भावे निर्हेतुकमेकरूपं वा जगत्स्यात् एतदुक्तं भवति सत्यपि भिन्ने कारणे यदि
कार्यभेदस्तदा समग्रं जगत् नानाविधकारणजन्यमेकरूपं स्यात् कारणभे
दानतुगमात् स्यात् तंचो निर्हेतुकं वा स्यात् यच्चोक्तं तेन त्रिगुणात्मनार्थेने
कस्यैव प्रमातुः सुखदुःखमोहमयानि ज्ञानानि न जन्यन्ते मेवं यथार्थस्त्रिगुण
स्तथा चित्तमपि त्रिगुणं यस्याचित्तस्यार्थे प्रति भासोत्पत्तौ धर्मोदयं सहकारिका

धर्मा१

त्कथमेको धर्मीति व्यपदेश इत्याशंक्याह परिणामैकत्वाद्वस्तुतत्वं यद्यपि
८२ त्रयो गुणास्तथापि तेषामंगांगिभावगमनलक्षणाय परिणामः क्वचित्सत्वमं
गि क्वचिद्रज क्वचित्तम इत्येवं रूपस्तस्यैकत्वाद्वस्तुनस्तत्वमेकत्वमुच्यते यथा
इयं पृथिवी अयं वायुरित्यादि ननु विज्ञानव्यतिरिक्ते सत्यर्थे वस्त्वेकमनेकं वा
वक्तुं युज्यते यदा विज्ञानमेव वासनावशात्कार्यकारणभावेनावस्थितं तथा त
था प्रतिभाति तदा कथमेतच्छक्यते व(क्तु)मित्याशंक्याह वस्तुसाम्ये चि
त्तभेदात्तयोर्विविक्तः पंथा तयोर्ज्ञानार्थयोर्विविक्तः पंथा विविक्तो मार्गः कथं
80

वोऽस्मिन्नुद्दर्शने प्रति पाद्यते तस्मादपवर्गपर्यंतमेकमेव चित्तं धर्मितया
ऽनुवर्तमानं न निक्रांतुं पार्यते तत्र ते धर्मधर्मिणः किंरूपा इत्याह ते व्यक्तसू
क्ष्मगुणात्मानः यत्र ते धर्म धर्मिणः प्रोक्तास्ते व्यक्तसूक्ष्मभेदेन ये अवस्थितागु
णाः सत्त्वरजस्तमोरूपास्तदात्मानः तत्स्वभावास्तत्परिणामरूपा इत्यर्थः
यतः सत्त्वरजस्तमोभिः सुखदुःखमोहरूपैः सर्वोसां वाह्याभ्यंतरभेदभिन्नानां
भावव्यक्तीनामन्वयोऽनुगमो दृश्यते यद्यदन्वयि तत्तत्परिणामरूपं दृष्टं यथा
घटादयो मृदन्विता मृत्परिणामरूपा दृश्यंते त्रयो गुणाः सर्वे च मूलकारणं त

नंचेत्प्रकाश्यत्वात्ग्रहणस्वभावमर्थस्यप्रकाश्यत्वाद्ग्राह्यस्वभावस्त्व
त्कथंयुगपत्सर्वार्थान्नगृह्णातिनस्मरतिचेत्याशंक्यपरिहारंवक्तुमाह
तदुपरागापेक्षितत्वात्चित्तस्यवस्तु ज्ञाताज्ञातं तस्यार्थेसोपरागा
दाकारसमर्पणाच्छिन्नेवाह्यंवस्तुज्ञातमज्ञातंचभवति।अयमर्थः सर्व
पदार्थाः आत्मलाभेसामग्रीमपेक्षतेनीलादिज्ञानंचोपजायमानमिंद्रिय
प्रणालिकयासमागतमर्थोपरागंसहकारिकारणत्वेनापेक्षतेव्यति
रिक्तस्यार्थस्यसंबंधाभावात् गृहीतुमशक्यत्वात्तेनतस्ययेनैवार्थे

रणंतत्कृत्वाशिवस्यतेनतेनरूपेणशिवव्याप्तिः तथाचकामुकस्यसं
निहितायांयोषितिधर्मेसहकृतंचित्तंसत्वस्यांगितयापरिणममानंसु
खमयंभवतितदेवाधर्मसहकारिरजसोंगितयादुःखरूपंसपत्नीमात्र
स्यभवतितीव्राधर्मसहकारितयात्मसोंगितयाकोपनायाःसपत्न्यामो
हमयंभवतितस्माद्विज्ञानव्यतिरिक्तोस्तिबाह्योर्थः तदेवंनविज्ञानवक्त्र
नोक्तातात्पर्यविरोधान्नकार्यकारणभावः कारणभेदेसत्यपिकार्यस्य ।
भेदप्रसंगात् इतिज्ञानात् व्यतिरिक्तत्वमर्थस्यव्यवस्थापितंयद्युक्तं ।

शंक्यपरिहर्तुमाह सदाज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामि
८६ त्‌ यास्ताश्चित्तस्य प्रमाणविपर्ययादिरूपावृत्तयस्तास्तत्प्रभोस्तस्य चित्त
स्यग्रहीतुः पुरुषस्य सदा सर्वकालमेव ज्ञेयास्तस्य चिद्रूपतयापरिणामि
82 त्‌ परिणामित्वाभावादित्यर्थः यदासौ परिणामी स्यात्तदा परिणामस्य
कादाचित्कत्वात्तासां चित्तवृत्तीनां सदा ज्ञातत्वं नोपपद्यते अयमर्थः पुरु
षस्य चिद्रूपस्य सदैवाधिष्ठातृत्वेन व्यवस्थितस्य यदन्तरंगं ज्ञेयं निर्म
लं सत्त्वं तस्यापि सदैव व्यवस्थितत्वात्तेन येनार्थेनोपरक्तं भवति तथा

तस्य ज्ञानस्य स्वस्वरूपोपरागः कृतस्तमेवार्थं ज्ञानं व्यवहारयोग्यतां न
यति तत एषोऽर्थो ज्ञात इत्युच्यते येनाकारेण समर्पितः स न ज्ञातत्वेन
व्यवह्रियते यस्मिंश्च ज्ञाने भूतेऽर्थे सादृश्यादिनार्थः संस्कारसुबोधयन् स
हकारिकारणतां प्रतिपद्यते तस्मिन्नेवार्थे स्मृतिरुपजायते इति न स
र्वत्र ज्ञानं नापि सर्वत्र स्मृतिरिति न कश्चिद्विरोधः यद्येवं प्रमातापि पुरु
षो यस्मिन्काले नीलं संवेदयति न तस्मिन्नेव काले पीतमतः चित्तवत्तस्या ७
पि कादाचित्कत्वं गृहीतं रूपत्वादाकारग्रहणे परिणामित्वं चास्मिन्त्या

ईश्वरत्वमेवक्षित्तस्यासिद्धंकिंचसुखदुःखसंवेदनव्यापारेणपुरुषाणांहिताहि
९७ तप्राप्तिपरिहाररूपाःप्रवृत्तयोदृश्यन्तेतथाहिदुःखद्वेषंनीतोहमत्रमेराग
ऽस्मेवमाद्यासंविदोदुःखद्वेषेदनेनोपपन्नेत्याशंकांनिरासयितुमाह एक
समयेचोभयानवधारणं अर्थस्यसंवित्तिरिदंतयाव्यवहारयोग्यतापा
87 दनेमयमर्थःसुखहेतुर्दुःखहेतुर्वेतिबुद्धेष्वसंविदहमित्येवमाकारेण
सुखदुःखरूपतयाव्यवहारक्षमतापादनमेवंविधंचव्यापारद्वयमर्थप्रत्य
क्षताकालेनयुगपत्कर्तुंशक्यंविरोधान्नहिविरुद्धयोर्व्यापारयोर्युगप

विधस्य दृश्यस्य स्वैव चिच्छायासंक्रांतिं तज्जावं तस्यां सत्यां सिद्धं सदा स्वा
त्वमिति न कदाचित्परिणामित्वाशंकानन्नु चित्तमेव सत्त्वोत्कर्षात्
यदि प्रकाशकं तथा स्वपरप्रकाशकत्वादात्मानमर्थं च प्रकाशयतीति
तावतैव व्यवहारसमापत्तिः कृतं गृहीतं तरेणेत्याशंकामपनेतुमाह
न तत्स्वाभासं दृश्यत्वात् तच्चित्तं स्वाभासं स्वपरप्रकाशकं न भवति
पुरुषवेद्यं भवतीति यावत् कुतः दृश्यत्वात् यत्किल दृश्यं तद्द्रष्टृवेद्यमेव दृ
ष्टं यथा घटादि वेद्यं च चित्तं तस्मान्न स्वाभासं ननु च साध्याविशिष्टोयं हेतु

स्यान्नास्तु स्वप्नायुक्तेणाप्यर्थप्रतीतिर्न स्यात्तन्न हि प्रतीतावप्रतीतायामर्थः प्रती
८८ तो भवति स्मृतिसंकरश्च प्राप्नोति रूपे से वा समुत्पन्नायां बुद्धौ तस्या हि कारण
मनंतानां बुद्धीनां समुत्पत्तेर्बुद्धिजनितैः संस्कारैर्यदा युगपद्व्यक्ताः स्मृतयः
84 क्रियंते तदार्थबुद्धेरपर्यवसानात् बुद्धिस्मृतीनां युगपदुत्पन्नेः कस्मिन्न
र्थे स्मृतिरियमुत्पन्नेति ज्ञातुमशक्यत्वात्स्मृतीनां संकरः स्यादितीयं रूपे।
स्मृतिरियं से स्मृतिरिति न ज्ञायते न तु बुद्धेः स्वप्रकाशत्वान्नावे बुद्ध्यंतरेणाप्या
संवेदने कथमयं विषयसंवेदनरूपो व्यवहार इत्याशंक्यास्वसिद्धांतमाह

६२

त्संभवोस्ति अन्तरकस्मिन्काले त्रुनयस्य स्वरूपस्यार्थस्य चावधारयितुमश
क्यत्वान्न चित्तं स्वप्रकाशकमित्युक्तं नवतिष्ठिं व एवंविधव्यापारकयंत्रिष्या
यफलद्वयस्यासंवेदनाद्बहिर्मुखतयैवार्थनिष्ठत्वेन चित्तस्य संवेदनाभावा
दर्थनिष्ठमेव फलं न त्वनिष्ठमित्यर्थः नन्वस्मात्स्मृहे स्वयं ग्रहणं वृत्त्यंतरे
णास्मिष्यतीत्याशंक्याह चित्तांतरदृश्यात् बुद्धिर्बुद्धेरतिप्रसंगः स्मृतिसं
करश्च यदि बुद्धिर्बुद्ध्यंतरेणग्राह्यते तदा सापि बुद्धिः स्वयं बुद्ध्यंतरं प्रका।
श्यितुमसमर्थाइति तस्याग्राहकं बुद्ध्यंतरं कल्पनीयं तस्याप्यन्यदित्यनव।

शान्तश्चासंपद्यते तस्माद्बुद्धेः स्वस्यात्मनो वेदनं भवतीत्यर्थः इत्थं स्वसंवेदितं
८५ चित्तं सर्वार्थग्रहणसामर्थ्येन सकलव्यवहारनिर्वाहकं क्षमं भवतीत्याह
दृष्टृदृश्योपरक्तं चित्तं सर्वार्थं दृष्टा पुरुषस्तेनोपरक्तं तत्संनिधानेन तद्रूप
तामिव प्राप्तं विषयोपरक्तं गृहीतविषयाकारपरिणामं यदा भवति त
85
दा तदेव सर्वार्थग्रहणसमर्थं जायते यथा निर्मलस्फटिकदर्पणाद्येव
प्रतिबिंबग्रहणसमर्थमेवं रजस्तमोभ्यामनभिभूतं सत्त्वं शुद्धत्वाच्चिच्छा
याग्रहणसमर्थं भवतीति न पुनरशुद्धत्वाद्रजस्तमसी तदभिभूतरजस्तमो।

चितेरप्रतिसंक्रमायास्तदाकारापत्तौ स्वबुद्धिसंवेदनं पुरुषश्चिद्रूपत्वा
च्चितिः साप्रतिसंक्रमा न विद्यते प्रतिसंक्रमोऽन्यत्रगमनं यस्यास्तथा कास्य
न्येनासंकीर्णेति यावत् यथा गुणानामंगांगिभावगमनलक्षणोपरिणामे
ऽनंगिगुणमुपसंक्रामति तद्रूपतामिवापद्यते यथा वा लोके परमाण
वः प्रसरंतो विषयमात्मरूपयंति नैवं चित्तिशक्तिः तस्याः सर्वदैकरूपतयास्व
प्रतिष्ठितत्वेन व्यवस्थितत्वात् अतस्तत्संनिधाने यदा बुद्धिस्तदाकारतामा
पद्यते चेतनेवोपजायते बुद्धिवृत्तिप्रतिसंक्रांता च यदा चिच्छक्तिर्बुद्धिवृत्त्या वे

ह्येयकर्मात्मरूपंसुखदुःखभोक्तृतयाध्यवसीयते यद्रूपंतामनुद्रिक्तत्वादेकस्मा
९० पिगुणस्यकदाचित्कस्यचिद्रंगित्वात्त्रिगुणंप्रतिक्षणंपरिणममानंसुखदु
खमोहात्मकमनिर्मलंतस्मिन्कर्मात्मरूपेबुद्धिसत्त्वेस्वाकारसमर्पण
86 कारेणसंवेद्यतामासादयतितत्बुद्धिमात्रंचित्तसत्त्वमेकतःप्रतिसंक्रां
तचिच्छायमन्यतोगृहीतविषयाकारेणचित्तेनोपढौकितस्वाकारंचि
त्संक्रांतिबलात्चेतनायमानंवास्तवचैतन्याभावेपिसुखदुःखरूपभो
गमनुभवतिसएवंभोगोत्यंतसांनिध्येनविवेकाग्रहणाद्भोक्तुरपिपु

गितया सत्त्वं निष्कलप्रदीपशिखाकारं सदैवैकरूपतया परिणामभा
नं चेच्छायाग्रहणसामर्थ्यादामोक्षप्राप्तेरवतिष्ठते यथायस्कान्तसंनिधा
ने लोहस्य चलत्वमाविर्भवति एवं चिद्रूपपुरुषसंनिधाने सत्त्वस्याभ्यन्ति
व्यंग्यमभिव्यज्यते चैतन्यं अत एवास्मिन्दर्शने द्वे चितिशक्ती नित्योदिताभि
व्यंग्या च नित्योदिता चिच्छक्तिः पुरुषस्तत्संनिधानेनाभिव्यक्तमभिव्यंग्यं
चैतन्यं सत्त्वं अभिव्यंग्या चिच्छक्तिः तदत्यंतसंनिहितत्वादंतरंगं पुरुषस्य भोग्य
तां प्रतिपद्यते तदेव शान्तब्रह्मवादिभिः सांख्यैः पुरुषस्य परमात्मनः अधि

८१ धायियेवसत्वगतायाश्चितिच्छायायाप्रतिबिंबे पुरुषस्यसांनिध्योपि
व्यक्तिः सेवप्रतिबिंबनमुच्यते यादृशी पुरुषगता चिच्छक्तिस्तच्छायाया
त्राप्याविर्भवतीतियदुक्तमसत्यंत निर्मलः पुरुषः कथमनिर्मले सत्वे
प्रतिसंक्रामतिइतितदप्ययुक्तंनैकांतिकनैर्मल्यापकृष्टेपिजलादर्
शादित्यादयः प्रतिसंक्रांताः समुपलभ्यंतेयदुक्तमपरिणामिन्यस्यनास्ति
प्रतिसंक्रांतिरितितदप्यनुपपन्नं व्यापकस्याप्याकाशस्यदर्पणादौप्र
तिसंक्रांतिदर्शनात् एवंसतिनकश्चिदनुपपत्तिः प्रतिबिंबदर्शन

पुरुषस्य भोग इति व्यपदिश्यते अनेनैवाभिप्रायेणाविंध्यवासिनोक्तं स
त्वतथात्वमेव पुरुषस्य तथात्वमिति अन्यत्रापि प्रतिबिंबमानच्छाया
सदृशच्छायांतरोद्भवः प्रतिबिंबशब्देनोच्यते एवं सत्वेपि पौरुषेयचिच्छा
यासदृशस्वकीयचिच्छायांतराभिव्यक्तिः प्रतिबिंबशब्दार्थः ननु प्रतिबिं
बं नामानिर्मलस्य नियतपरिमाणस्य निर्मलत्वे दृष्टं यथा मुखस्य दर्पणे तु
त्वं तन्निर्मलस्य व्यापकस्य च पुरुषस्य तस्मात् निर्मलत्वे कथं प्रतिबि
बनमुपपद्यते ऽत्र ब्रूमः प्रतिबिंबनस्य स्वरूपमनवगच्छतामवतेदमस्य

मद्वयेसहजंशक्तिद्वयमस्तितद्देवपुरुषार्थकर्तृत्वोत्पत्तौसतेषांचयत्नेना
९२ याश्चापिप्रकृतेःसहजैवतत्रमहदादिमहाभूतपर्यन्तोत्पत्ता प्रकृतेस्तत्रा
नुलोमपरिणामःपुनःस्वकारणानुप्रवेशद्वारेणस्थितौततःप्रतिलोमप
रिणामःइत्थंचपुरुषस्याभोगपरिसमाप्तेःसहजशक्तिद्वयसहजातस्फूर्ता
यांप्रकृतिर्नपुनःपरिणाममारभतेएवंविधायांचपुरुषार्थसंजातस्फूर्तायां
जन्मायाञ्चापिप्रकृतेर्नकदाचिदनुपपत्तिःननुयादृशीशक्तिःसहजैव
प्रधानस्यास्तितत्किमर्थेनदृष्टिनिमित्तायापन्नःक्रियतेमोक्षस्यचा

म्यानन्तु मालिकपरिणाममनुपेतुद्धिसत्त्वे पुरुषसन्निधानादभिव्यंग्याया:
चिच्छक्तेर्बोद्धाध्याकारसंक्रान्तो पुरुषस्य सुखदुःखरूपो भोगइत्युक्तं तदनु
पपन्नं तदेव चित्तसत्त्वं प्रकृत्या परिणतायां कथं संभवति किमर्थं च त
स्यापरिणामः अथोच्यते पुरुषस्यार्थोपभोगसंपादनं तथा कर्त्तव्यमतः
पुरुषार्थकर्त्तव्यतया तस्यां सत्त्व एव परिणामः तन्नोपपन्नं पुरुषार्थकर्त्त
व्यतोच्यते जडायाश्च प्रकृतेः कथं प्रथममेवंविधोध्यवसायः अपि
चेदध्यवसायः कथं जडत्वं अथोच्यते अनुलोमप्रतिलोमलक्षणपरिणा

ए
स्यतायाः
पपत्तेः पुरु
र्थोपभोगाक
स्त्वेवंविधो
वसायः पुरु
वार्त्त २

कारिणमपेक्ष्यमोक्षाख्यंफलमासादयतिसर्वोप्येवंचकार्योणिघाम्ना
६३ यांसमग्रायांसामग्र्यामात्मानंलभतेअस्यचप्रतिलोमपरिणामर्हेतारे
णोत्पाद्यस्यमोक्षाख्यकार्यस्यैहस्यनसामग्रीसमाणेननिष्कितासका
रांतरेणानुपपन्नेस्तांविनाकथंनविष्णुमर्हतिअतःस्थितमेतत्
89 संक्रांतविषयोपरागमभिव्यक्तचित्सायंबुद्धिसत्त्वंविषयनिश्चय
द्वारेणसमग्रांलोकयात्रांनिर्वाहयतिइतिएवंविधमेवचित्तंपश्य
तोभ्रांताःस्वसंवेदनंचित्तंचित्तमात्रंजगदित्येवंब्रुवाणाःप्रतिबोधि

नर्थनीयत्वेतदुपदेशकस्य:शास्त्रस्याप्यानर्थक्यं तेऽव्यतेयोयंमुक्तिदुःख
षयोरनादिर्भोगभोक्तृभावलक्षणः संबंधस्तस्मिन्सतिव्याप्तश्चैतन्यापु
षकृतेकर्तृत्वाभिमानात् दुःखानुभवेसतिकथमेयंदुःखनिवृत्तिरात्य
न्तिकीममस्यादितिभवत्येवाध्यवसायः अतोदुःखनिवृत्त्युपायोपदेश
कशास्त्रोपदेशापेक्षास्त्येवंप्रधानस्यतथाभूतमेवचकालेनोक्तरूपं तु द्वि
सत्वं शास्त्रोपदेशस्यविषयः दर्शनांतरेष्वप्येवंविधएववैद्यशास्त्रादिवत्
शास्त्रेविधिःक्रियतेसचमोक्षायप्रयतमानरावंविधमेवशास्त्रोपदेशंसह

६४ जिसंहत्यकारीणि अतः परार्थानि यश्च परः स पुरुषः ननु च यादृशेन शयना
दीनां परेण शरीरवता परार्थत्वमुपलब्धं तादृशं तद्बलेन तादृश एव परः
सिध्यति यादृशश्च भवतां परोऽसंहतस्तद्योऽसिद्धेस्तद्विपरीतस्य सिद्धेरिष्टवि
५० घातकृद्धेतुरुच्यते यद्यपि सामान्येन परार्थमात्रत्वेन व्याप्तिर्गृहीता तथा
पि सत्त्वादिविलक्षणधर्मिपर्यालोचनया तद्विलक्षण एव भोक्ता परः सिध्यती
ति यथा चंदनवनाद्धूमेऽग्नि रवह्निणि विलक्षणाद्धूमाद्वह्निरनुमीयमानश्चंद
नवह्निर्विलक्षणश्चंदनप्रभव एव प्रतीयते एवमिहापि विलक्षणस्य संतापस्य

तामनवंति ननु यद्येवंविधाद्देवचित्तात्सकलव्यवहारनिष्पत्तिः कथंप्र
माणशून्योऽयमुपगम्यत इत्याशंकायां तत्र प्रमाणमाह तदनंते
यवासनानिष्क्रान्तमपि परार्थं संहत्यकारित्वात् तद्देवचित्तं संक्लेशमश
क्यानिर्वासनानिष्क्रान्तमपि नानारूपं परार्थं परस्य स्वामिनो भोक्तुर्भो
गापवर्गलक्षणमर्थं साधयतीति कुतः संहत्यकारित्वात् संहत्य संभूय
मिलित्वार्थक्रियाकारित्वात् यद्यत्संहत्यार्थक्रियाकारि तत्परा
र्थं दृष्टं यथा शयनासनादि सत्त्वरजस्तमांसि च चित्तलक्षणपरिणामं ना

रानुलोम्येन प्रातिलोम्येन च अंगांगिभावस्थितिलक्षणः तस्य योसौ क्रमो वक्ष्यमा
९० णस्तस्य परिसमाप्तिर्निष्ठा पुनरनुद्भव इत्यर्थः क्रमस्योक्तस्य लक्षणमाह क्षणप्र
तियोगी परिणामापरान्तनिर्ग्राह्यः क्षणोल्पीयान्कालस्तस्य योसौ प्रतियोगे य
कः क्षणविलक्षणपरिणामोपरान्तनिर्ग्राह्यः अनुभूतेषु क्षणेषु पश्चात्संकल
91 नाबुद्ध्या एव यो गृह्यते स क्षणानां क्रम उच्यते न ह्यननुभूतेषु क्षणेषु क्रमः प
रिकलयितुं शक्यः इदानीं फलभूतस्य कैवल्यस्यासाधारणं स्वरूपमाह पुरुषा
र्थशून्यानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति समाप्त

युक्ता हि भेदेन त्रिविधानां ज्ञानोदयात्सर्वे कारणनिवृत्त्या निवृत्तिं नेवतीत्यर्थः
निवृत्तेषु तेषु किं भवतीत्याह तदा सर्वावरणापेतस्य ज्ञानस्यानंत्यात्ज्ञेयमल्पं
आव्रियते चित्तमेभिरिति आवरणानि क्लेशाः तेभ्योपेतस्य तद्विरहितस्य ज्ञान
स्य गतघनगगननिभस्यानंत्यादनवच्छेदात्ज्ञेयमल्पं गणनास्पदं न भवति
अक्लेशेनैव सर्वं ज्ञेयं जानातीत्यर्थः ततः किमित्याह ततः कृतार्थानां परिणाम
क्रमसमाप्तिर्गुणानां कृतो निष्पादितो भोगापवर्गलक्षणः पुरुषार्थः प्रयो
जनं यैस्ते कृतार्थाः गुणाः सत्त्वरजस्तमांसि तेषां परिणाम आपुरुषार्थसमाप्ते

९६ धर्ममुपायमाह प्रसंख्यानेऽप्यकुसीदस्य सर्वथा विवेकख्यातेर्धर्ममेघः समाधिः
प्रसंख्यानं यावतां तत्त्वानां यथाक्रमं व्यवस्थितानां परस्परविलक्षणस्वरू
पपरिभावनं तस्मिन् सत्यप्यकुसीदस्य फलमलिप्सोः प्रत्ययांतराणामनुद
ये सर्वप्रकारं विवेकख्यातेः परिशेषात् धर्ममेघः समाधिर्भवति प्रकृष्टमशुक्ल
कृष्णं धर्मं परपुरुषार्थसाधनं मेहति सिंचतीति धर्ममेघः अनेन प्रकृष्टस्य
धर्मस्यैव ज्ञानहेतुत्वमित्युपादितं भवति तस्माद्धर्ममेघात् किं भवतीत्याह
९२ ततः क्लेशकर्मनिवृत्तिः क्लेशानामविद्यादीनामभिनिवेशांतानां कर्मणां च

नि १

रालेषु यानि प्रत्ययांतराणि व्युत्थानरूपाणि ज्ञानानि तानि प्राक्तनेभ्यो व्युत्
थानानुभवजेभ्यः संस्कारेभ्योऽहंममेत्येवंरूपाणि क्षीयमाणेभ्योपि प्रभवंति
अतः कारणोच्छित्तिद्वारेण तेषां हानं कर्त्तव्यं इत्युक्तं भवति हानोपायः पूर्व
मेवोक्त इत्याह ॥ हानमेषां क्लेशवदुक्तं ॥ यथा क्लेशानामविद्यादीनां हानं
उक्तं पूर्वं तथा संस्काराणामपि कर्त्तव्यं यथा ते ज्ञानाग्निना प्लुष्टदग्धबीजकल्पान
पुनश्चित्तभूमौ प्ररोहं लभंते तथा संस्कारा अपि एवं प्रत्ययांतरानुदयेन स्थि
रीभूते समाधौ यादृशस्य योगिनः समाधिप्रकर्षप्राप्तिर्भवति तथा वि

पंतस्य विज्ञातचित्तस्वरूपस्य चित्ते यात्मभावभावना सा निवर्तते चित्तमेव क
९५ र्तृ ज्ञातृ भोक्तृ इत्यभिमानो निवर्तते तस्मिन्सति किं भवतीत्याह तदा विवेक
निम्नं कैवल्यप्राग्भारं चित्तं यदस्याज्ञाननिम्नमज्ञानपथवाहिवहिर्मुखं
93 विषयोपभोगफलं चित्तमासीत् तदिदानीं विवेकनिम्नं विवेकमार्गवाह्यंतर्मु
खं कैवल्यप्राग्भारं कैवल्यफलं कैवल्यप्राग्भारं वा संपद्यते इति अस्मिंश्च विवे
कवाहिनि चित्ते येंतरायाः प्रादुर्भवंति तेषां हेतुप्रतिपादनद्वारेण त्यागोपायमाह
तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः तस्मिन्समाधौ स्थितस्य छिद्रेष्वंत

भोगस्य परार्थत्वेनुमीयमाने तथाविध एव भोक्ताक्षिप्तात्मापरश्चिन्मात्ररूपोऽसं
हतः सिध्यति यदि च तस्य परत्वे सर्वोत्कृष्टत्वमेव प्रतीयते तथापि तावत्स्वेभ्यो वि
षयेभ्यः प्रकृष्यते शरीरं प्रकाशरूपेन्द्रियाश्रयत्वात् तस्मादपि प्रकृष्यन्ते
इन्द्रियाणि ततोपि प्रकृष्टं सत्त्वं प्रकाशरूपं तस्यापि यः प्रकाशकः प्रकाश्यवि
लक्षणः स चिद्रूप एव भवतीति कुतस्तस्य संहतत्वं इत्थंभूतस्य फलकैव
ल्यं निर्णेतुं शास्त्रैः सर्वैरुपक्रम्यते विशेषदर्शिन आत्मभावनानिवृत्तिः ए
वं सत्त्वपुरुषयोरन्यत्वे साधिते यस्तयोर्विशेषं पश्यति अहमस्मादन्य इत्येवं त

...नवाङ्गसिद्धीश्चित्तदार्ढ्याय समाधेः समाभ्यासो।
...दानीं स्वदर्शनोपयोगि सबीजनिर्बीजसमाधिसिद्धये वि
षोपायप्रदर्शनायाह। स्थूलस्वरूपसूक्ष्मान्वयार्थवत्त्वसंयमाद्भूतजयः॥ पं
चानां पृथिव्यादीनां भूतानां ये पंचावस्थाविशेषधर्माः स्थूलत्वादयः तत्र
कृतसंयमस्य भूतजयो भवति भूतानि वश्यान्यस्य संभवंतीत्यर्थः तथा हि
भूतानां परिदृश्यमाने विशिष्टाकारवत् स्थूलं रूपं स्वरूपं चैषां यथाक्रमं
काठ्यस्नेहोष्णताप्रेरणावकाशदानलक्षणं सूक्ष्मं च यथाक्रमं भूतानां का

९५

६२ रणत्वेन अवस्थितानि तन्मात्राणि अन्वयिनो गुणाः प्रकाशप्रवृत्तिस्थिति
रूपतया सर्वत्रैवान्वयित्वेन समुपलभ्यंते अर्थवत्वं तेष्वेव गुणेषु भोगाप
वर्गसंपादनाख्या शक्तिः तदेवं भूतेषु पंचसु कृतलक्षणावस्थाभिन्नेषु प्र
त्यवस्थं संयमं कुर्वन् योगी भूतजयी भवति तद्यथा प्रथमं स्थूलरूपे संय
मं विधाय तदनु सूक्ष्मरूपे इत्येवं क्रमेण तस्य कृतसंयमस्य संकल्पा
नुविधायिन्यो वत्सानुसारिण्यो ऽव गावो भूतप्रकृतयो भवंति तस्यैव [illegible]
[illegible] ततोणिमादिप्रादुर्भावः कायसंपत्तद्धर्मान

दृत्युपपन्नं न हि संवेद्यं संवेदनेनैव स्त वितुमर्हतीति किंवा देनवादिभिः कृ
१०० र्मात्मपरमात्मभेदे स्वात्माद्विष्ठच्यते तद्येनैव रूपेणास्तु स्वकृतकर्मा
त्मत्वं कर्मात्मनस्तेनैव रूपेण यदि परमात्मनः स्यात्तदा कर्मात्मवत्परमा
९५ त्मनः परिणामित्वमविद्यावत्त्वं च स्यात् अथ न तस्य साक्षात् भोक्तृ
नर त्वं किं तु कर्तृपदे सोऽयं स्वासीनतया धिष्ठातृत्वेन स्वीकरोतीति दास्मद् दर्शना
नुयायिनः आनंदरूपता च पूर्वमेव निराकृता किंवा विद्यास्तु भावत्वे निःस्व
भावत्व कर्मात्मनः कथं शास्त्राधिकारिता वत् नित्यनिर्मुक्तत्वात्पर

तेसुखे सम्मत्यन्ते
तोवस्थायानानात्मस्य स्मृतमवितृत्वं न तस्या मे स्तात्स्थायां दुःखानुभवितृत्वं त्र
मित्वान्नात्मत्वं नापि स्वत्वर्हमित्र प्यावस्था वतोपिनामात्वं नानात्वे न च परिला
वसंसारदूषणायां मोक्षस्य सत्वं स्मृतएव सुशंस वृक्षवादिभिसांख्यैरात्मनः सदे
न च्छिद्यानंदमयत्वमात्मनः पांचेकरूपत्वमंगीक्रियते येतुवेदांतवादि
दस्य सुखस्वरूपत्वात्सुखस्य मोक्षेसत्वं तेतेषां न युक्तः पक्षः तथाहि सात्रं
मात्र्द्वैतहानिः अपसुखात्मत्वेच सरेवं मे वेदनसंवेद्ययोर्द्वयोरनुपग
संवेद्यमानतयास्वप्रतिभासारसंवे[illegible]मानत्वमेवतस्याच्यतेतद्विरुद्धधर्माध्यासा
त्वं च संवेदनव्यतिरेके[illegible]नुपपन्नमिति २

१०१

96

पद्यनिर्वाच्यत्वमुच्यते तद्वा कस्यचिदपि वाच्यत्वं न स्यात् ब्रह्मणोऽप्यवाच्यत्वप्रस
क्तिः तस्माद्विशिष्टात्स्वरूपताव्यतिरेकेणान्यद्वात्मनो रूपमनुपपद्यते अविशिष्टात्
त्वं च चिद्रूपत्वमेव तद्व्यतिरिक्तस्य धर्म्मस्य कस्यचित्प्रमाणानुपपत्तेः यैरपि नै
यायिकादिभिरात्मा चेतनायोगात् चेतन इष्यते चेतनापि तस्य मनःसंयोगजा
तथा हीच्छाज्ञानप्रयत्नादयो गुणास्तस्य व्यवहारदशायामात्ममनःसंयोगात्
उत्पद्यंते तैरेव गुणैः स्वयं ज्ञाता कर्त्ता भोक्तेति व्यपदिश्यते मोक्षदशायां तु मिथ्या
ज्ञाननिवृत्तौ तन्मूलानां दोषाणामपि निवृत्ते तेषां तु आत्मीयानां विशेषगुणानाम्

मात्मानाप्यविद्यास्वभावत्वात्कर्म्मात्मांतनष्वसकलशास्त्रवैयर्थ्यप्रसंगः अविद्या
मप्यत्वेचन्नगतेंगीकीयमाणेकस्याविद्येतिविचार्यतांनतावत्परमात्मनोनित्यनि
र्मुक्तत्वात्विद्यारूपत्वाच्चैवंकर्म्मात्मनोपिनित्यभावतयापाशाविद्याणामप्रवृत्वेक
घमविद्यासंबंधश्चघोच्यतेएतद्देवाविद्यायास्वंपदंविचारितंरमणीयत्वंनाम अविद्या४
येवहिविचारेणदिनकरकम्पहनीहारवत् विलयमुपयातिमेवाविद्येत्युच्यते
नेवंयदक्तु किंचित्कार्यंकरोतितद्भवप्यंकुतःतस्मिन्नभिन्नंवादक्तव्यं अवि
द्यायाश्चसंसारलक्षणप्रपंचकार्यकर्तृत्वमवश्यमंगीकर्त्तव्यं तस्मिन्नत्यपि

शास्त्रोपदिष्टमनुष्ठितं कर्म तस्यैव नो कृत्वं भवेत्तदा हिताहितप्राप्तिपरिहारार्थो
सर्वस्यप्रवृत्तेर्यदि तत्सर्वस्यैव व्यवहारस्य हानोपादा नलक्षणस्यानुसंधानेनैरा
त्म्यात् स्थानहरणानां परस्परभेदेनानुसंधानाभावे कस्यचित्व्यवहारस्या
नुपपत्तेः कर्मभोक्तानुसंधाता यस्स आत्मेति सर्वस्याप्यते सोहंप्रत्ययानुसक
लग्राह्यग्राहकलक्षणव्यवहाराभावाच्चैतन्यमात्रमेव तस्यावशिष्येते तत्त्वे
तन्नं चित्तिमात्रत्वेनैवोपपद्यते न पुनरात्मसंबंधेन यस्माद्धि सर्वग्रहणासमर्थ
त्वमेव चित्तेरूपं नात्मग्राहकत्वं तथाहि अर्थच्छित्याग्राह्यमाणोयं भित्तिर

भोगापवर्गलक्षणपुरुषार्थानांगुणानांयःप्रतिप्रसवःप्रतिलोमस्यपरिणाम
समाप्तौविकारानुद्भवःयदिवाचितिशक्तेर्वृत्तिसारूप्यनिवृत्तौस्वरूपमात्रेवस्थानं
तत्कैवल्यमुच्यतेनकेवलमस्मद्दर्शनेत्तेवशःकैवल्यावस्थायामेवंभूतश्चि
द्रूपायावद्दर्शनांतरेष्वपिविमृश्यमानएवंरूपएवावतिष्ठतेतथाहिसंसारदशा
यामात्माकर्तृत्वभोक्तृत्वानुसंधानमयःप्रतीयतेअन्यथायद्ययमेकःहेतु
स्तथाविधोनस्यात्तदाज्ञानक्षणानामेवपूर्वापरानुसंधानशून्यानांभावेनि
यतःकर्मफलसंबंधोनस्यात्कृतनाशाकृताभ्यागमप्रसंगश्चयदियेनैव

णातिस्तस्यां संयोगे सति यस्यात्मनोऽधिष्ठातृत्वं चिच्छायासमर्पणसामर्थ्यं बुद्धिस
त्त्वस्य च संक्रान्तचिच्छायाग्रहणसामर्थ्यं चिद्वद्भासनायाश्च बुद्धेर्योऽयं कर्तृत्वेनो
त्कृत्वाध्यवसायस्तत एव सर्वस्यानुसंधानपूर्वस्य व्यवहारस्य निष्पत्तिः किम
न्यैः फल्गुभिः कल्पनाजालैर्यदि पुनरेवं न तन्मार्गप्रवृत्तिरेकेणापारमार्थिक
मात्मनः कर्तृत्वमङ्गीक्रियते तदास्य परिणामित्वप्रसंगः परिणामित्वाच्चा
नित्यत्वं तस्यात्मत्वमेव न स्यात् न ह्येकस्मिन्नेव समये एकेनैव रूपेण परस्प
रविरुद्धावस्थानुभवितृत्वं [illegible] भवति तथा हि यस्यामवस्थायामात्मसमवे

ह्यते स्वरूपं गृह्यमाणमहमिति न पुनर्युगपद्बहिर्मुखत्वांतर्मुखतालक्षणं व्यापा
रद्वयं परस्परविरुद्धं कर्तुं शक्यं अत एकस्मिन्समये व्यापारद्वयस्य कर्तुमश
क्यत्वात् चिद्रूपतया एवावतिष्ठते अतो मोक्षावस्थायां निवृत्ताधिकारे
षु गुणेषु चिन्मात्ररूप एवात्मावतिष्ठते इत्येवं युक्तं संसारदशायां तु एवं स्व
रूपस्यैव कर्तृत्वं भोक्तृत्वमनुसंधा तृत्वं च न सम्यगुपपद्यते तथाहि योयं प्रकृत्या सा
र्धमनादिर्नैसर्गिकोस्य भोग्यभोक्तृभावलक्षणः संबंधो विवेकख्यातिमूलस्त
स्मिन्सति पुरुषार्थकर्तव्यतारूपशक्तिद्वयमज्ञावेया महदादिभावेन परि

९९

संतोल्लिखितस्वरूपमात्रप्रतिष्ठत्वमात्मनोंगीकृतं तेषां न युक्तः पक्षः यतस्तस्यां द
शायां किलात्मनो नित्यत्वव्यापकत्वादयो गुणाश्चाकाशादीनामपि संतीत्यतस्त
द्वैलक्षण्येनात्मनः किंचिद्रूपमवश्यमंगीकर्तव्यं आत्मत्वलक्षणजातियोगइ ति
ति सर्वथैव सत्ताजातियोगः संभवति अतो जडेभ्यो वैलक्षण्यमात्मनो वश्यमंगीक
र्तव्यं तच्चाधिष्ठातृत्वं चिद्रूपतयैव घटते नान्यथा येरपि मीमांसकैः कर्मकर्तृ
रूप आत्मांगीक्रियते तेषां अपि न युक्तः पक्षः तथाहि अहंप्रत्ययग्राह्य आत्माऽ
स्ति तेषां प्रतिज्ञा अहंप्रत्यये च कर्तृत्वं कर्मत्वं चात्मन एकस्मिन्नेव तद्विरुद्धत्वादनुपपन्न

लेकर्तृत्वं प्रमातृत्वं कर्म्मत्वं प्रमेयत्वं नचैते न विरुद्धधर्म्माध्यासो युगपदेकस्य घटते य
१२ द्विरुद्धधर्म्माध्यस्तं न तदेकं यथा भावाभावौ विरुद्धौ च कर्तृ कर्मत्वे त्वयोश्चाते न
कर्तृत्वकर्मत्वयोर्विरोधः किंतु कर्तृत्वकरणत्वयोरेव विरोधो न कर्तृत्वकर्मत्व
रीति ४ योः तस्मादहंप्रत्ययग्राह्यत्वं परिहृत्यात्मनोधिष्ठातृत्वमेवोपपन्नं तच्चेतनत्वमेव
यैरपि द्रव्यपर्यायभेदेनात्मनो व्यापकस्य शरीरपरिणामस्य परिणामित्वमिष्यते
तैः प्रागुक्त्यानपराहत एव पक्षः परिणामित्वे चिद्रूपताहानेः चिद्रूपताभावे किमात्म
नश्चात्मत्वं तस्मादात्मन आत्मत्वमिच्छता चिद्रूपत्वमेवात्मनोऽङ्गीकर्तव्यं

न१

चेतनस्य कर्तृत्वं तस्य एकस्य रूपस्य संदेहस्य संनिहितत्वात् सर्वमेव फलमेक
रूपं स्यात् अथ नानारूपतया तस्य कर्तृत्वं तदा परिणामित्वाच्च न चिद्रूप
१०३ त्वं यतश्चिद्रूपत्वमात्मनः इष्टं ज्ञानमात्रं कर्तृत्वमङ्गीकृतं येषां तेषामस्मा
भिः कर्तृत्वमात्मनः प्रतिपादितं स्वरूपस्य नित्यस्य चिद्रूपस्य तद्देशोपप
100 न्नं एतेन स्वप्रकाशस्यात्मनो विषयसंवित्तिवारा ग्राहकत्वमभिव्यज्यते इति
ये वदन्ति तेषां मतेनैव निराकृताः केचिद्विमर्शात्मकत्वेनात्मनः चिन्मयत्वमिच्छ
न्ति तेषां ज्ञानं विमर्शव्यतिरेकेण चिद्रूपतां निरूपयितुं शक्या जडत्वात्किल

तत्राधिष्ठातृत्वमेवं केचित्तु कर्त्तृरूपमेवात्मानमिच्छंति तथाहि विषयसान्निध्ये
यात्मानलक्षणा क्रियासमुत्पन्ना तस्या विषयसंवित्तिफलं तस्यां च फलरूपायां
संवित्तौ स्वरूपं प्रकाशरूपतया प्रतिभासते विषयश्च ग्राह्यतया आत्मा ग्राहक
त्वेन घटमहं जानामीति अनेनाकारेण तस्यां समुत्पत्तौ क्रियायाः कारणं क
व ३ र्त्तैवेतीत्यतः कर्त्तृत्वं भोक्तृत्वं चात्मनो रूपमिति तदनुपपन्नं यस्मात्तासां संवि
त्तीनां किं कर्त्तृत्वं युगपत्स्यादिति पर्यायते क्रमेण वा युगपत्कर्त्तृत्वे क्षणांतरे कर्त्तृ
त्वं तस्य च न स्यात् अथ क्रमेण कर्त्तृत्वं तदेकरूपस्य न घटते एकेन रूपेण

त्मत्वेनैकान्त्यात्प्रतिपादितान्न प्रकाशात्मनः परस्य पुरुषस्य स्वरूपमवगतमि
त्येतस्मिन्सर्वेष्वपि दर्शनेष्वधिष्ठातृत्वं विहाय नान्यदात्मनो रूपमुपपद्यते
१०४ अधिष्ठातृत्वं च चिद्रूपत्वं तच्च जडाद्विलक्षणमेव । चिद्रूपतया यदधिति
101 ष्ठति तदेव भोग्यतां नयति यच्चैतेनाधिष्ठितं तदेव सकलव्यवहारयोग्यं
भवति एवं सति कृतकृत्यत्वात्प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैव
ल्यमस्माभिरुक्तं तद्विहाय दर्शनान्तराणामपि नान्या गतिः तस्माद्विद
मेव युक्तं वृत्तिसारूप्यनिवृत्तिद्वारेण स्वरूपप्रतिष्ठा चितिशक्तेः कैव
मुक्त

वेलस्य एवं चिद्रूपत्वमुच्यते तच्च विमर्शव्यतिरेकेण निरूप्यमाणं नान्यथाव
तिष्ठते तदनुपपन्नमिदमित्यमेवं रूपमिति यो विचारः स विमर्श उच्यते स चा
स्मिता व्यतिरेकेण स्थानमेव न लभते न च व्याहृतात्मनि रूपं जायमानो विम
र्शो ऽहमेवं न तु इत्यनेनाकारेण संवेद्यते तत्तस्याहंकाराहूसंभिन्नस्यास्व
त्मलक्षणस्यार्थस्य तत्र स्फुरणान्न विकल्परूपतेति क्रमः विकल्पश्चाध्य
वसायात्मकः तु द्विधर्मो न विद्धर्मेक्षारस्थ नियतत्वेन स्थितेः सद्वैवैकरूपत्वात्
नाहंकारानुप्रवेशः मइनेनस्व विमर्शात्मात्मनः प्रतिपादयतानुच्छिरेवा

नीतानागतादिषु धर्माणां सद्भावमुपपाद्य विज्ञानवादं निराकृत्य साका
रवादं प्रतिष्ठाप्य पुरुषस्य ज्ञातृत्वमुक्त्वा चित्तद्वारा सकलव्यवहारनिष्प
त्तिमुपपाद्य पुरुषस्य भोगमात्रमुपदर्श्य कैवल्यनिर्णयाय दशभिः सूत्रैः
क्रमेणोपयोगिनोऽर्थानभिधाय शास्त्रान्तरेऽप्येतदेव कैवल्यमुपपन्नमित्य
भिधाय कैवल्यस्वरूपं निर्णीतमिति व्याकृतः कैवल्यपादः इति श्रीधारे
श्वरविरचितायां पातञ्जलयोगशास्त्रवृत्तौ कैवल्यपादश्चतुर्थः समा
प्तः संवत् ॥ १८६१ ॥ भाद्रमासे कृष्णपक्षे दिन चतुर्दश्यां ॥ १४ ॥ श्रीरामकृ
ष्णायनमः श्रीरामायनमः श्रीगोपालायनमः श्रीरामकृष्णायनमः राम १०५

102

ल्पं तदेवं सिद्ध्यंतरेभ्यो विलक्षणं सर्वसिद्धिमूलं तां समाधिसिद्धिमभि
धायं जात्यंतरपरिणामलक्षणस्य च सिद्धिविशेषस्य प्रकृत्यापूरमेव कारण
मुपपाद्य धर्मादीनां प्रतिबंधकनिवृत्तिमात्रे एव सामर्थ्यमिति प्रदर्श्य निर्मा
णचित्तानामस्मितामात्राद्धेतुद्भवं इत्युक्त्वा तेषां च योगिचित्तमेवाधिष्ठाय
कत्वमिति प्रदर्श्य योगिचित्तस्य चित्तांतरवैलक्षण्यमभिधाय तत्कर्मणा
मलौकिकत्वं चोपपाद्य विपाकानुगुणानां च वासनानामभिव्यक्तिसा
मर्थ्यं कार्यकारणयोरैक्यरूपप्रतिपादनेनं च व्यवहितानामपि वासनाना
मानंतर्यमुपपाद्य तासामानंत्येपि हेतुफलादिद्वारेण हानमुपदर्श्य